- Title – दीपिका प्रकाशिका (तर्कसंग्रह)
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 68/136
- Lines-
- Size
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – श्रीमते रामानुजायनमः वंदे रामानुजमुनिं वंदारुजनकल्पकं अनन्तं
- End – नाति प्रसक्तः जतोमुणवृत्तित्व निवेशो प्रयोजन विरहेण।
- Colophon-
- Illustrations -
- Source -
- Subject - दर्शन
- Revisor -
- Author - श्रीरायनरसिंह पण्डित

1. Remarks- अपूर्ण, 1-60 पृष्ठ है 61-86 पृष्ठ तक अनुपलब्ध, 87-95 पृष्ठ है।

(हस्ताक्षर) / प्रवीण

89

न॰प्र॰
१

(1)

श्रीमते रामानुजाय नमः वंदे रामानुजमुनिं वंदारुजनकल्पकं अनंतसरसीतीरदिव्यनित्यकुडुंविनं
ध्यात्वा श्रीमत्पादपद्मं दीपिकायाः प्रकाशिका श्रीरायनरसिंहेन पण्डितेन चिकीर्ष्यते तत्र प्रारीप्सितग्रन्थ
विरामविरोधिविघ्नव्यूहविध्वंसनविचक्षणं विश्वनाथादिविनतिं शिष्यशिक्षार्थमादौ निबध्य शिष्या
वधानाय प्रारीप्सितं प्रतिजानीते विश्वेश्वरमित्यादिना विश्वस्य प्रपंचस्येश्वरं सृष्ट्यादिकर्तारमित्यर्थः
एतेनेश्वरेऽनुमानप्रमाणं सूचितं तथाहि कार्यं कृतिजन्यं कार्यत्वात् घटवत् भूतादीनां स्थितिः पत
नप्रतिबन्धकप्रयत्नप्रयुक्तास्थितित्वात् निततम्बवत्तम्रस्त्वपुत्रादिस्थितिवत् प्रपंचनाशः प्रयत्नज
न्यः नाशत्वात् श्रस्महादिकर्तृकपटनाशवत् इत्यनुमानात्कृतिजन्यत्वसिद्धौ तद्घटकत्वमाश्रय
त्वस्येतरेषां बाधात् तदाश्रयतयेश्वरः सिध्यति एतेनेश्वरे प्रमाणाभावात् तद्विषयकमंगलाचरण
मयुक्तमिति शंका निरस्ता ईश्वरेऽनुमानरूपप्रमाणप्रदर्शनं चोपलक्षणं यतो वा इमानि भूतानि

जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति श्रुतिरपि तत्प्रमाणमिति बोध
म् नमस्कार्यस्य विश्वनाथस्य संतुष्टतां सूचयितुमाह सांबमूर्तिमिति अम्बया सहिता मूर्तिर्यस्येति
व्युत्पत्त्या अर्धनारीश्वरस्य पार्वत्यालिंगितशरीरस्य शिवस्य लाभात् तादृशं विश्वनाथं प्रणम्येत्यर्थ
लाभः ननु गणाधिपतेरेव विघ्ननाशकत्वात् विघ्ननाशार्थं कथं विश्वनाथनमस्कारः कृत इति चेत् न ग
णेभ्यो गणपतिभ्यश्च वो नमः इति श्रुत्या शिवस्यापि गणपतित्वप्रतिपादनात् वाग्देव्याः विद्यागुरोश्च प्र
सादाभावे इष्टसिद्धिर्न भवतीति तदर्थं तां तं च प्रणमति गिरं गुरुमिति [illegible] वाग्देवतां विद्यागुरुं चे
त्यर्थः प्रणिपत्येत्यर्थः प्रणिपत्येत्यस्य काकाक्षिन्यायेनात्राप्यन्वयः शिशुहितामिति शिशूनां ग्रहणधारणा
सक्तानां हितां बोधनसमर्थामित्यर्थः एतेन स्वीयव्याख्यायाः काठिन्याभावलाभात् तेषां काठिन्यज्ञानप्र
युक्तप्रवृत्त्यभावशंका निराकृता कस्य ग्रन्थस्येत्याशंकां परिहरति तर्कसंग्रहदीपिकामिति तर्कसंग्रहा

स्वग्रन्थस्य दीपिकां तर्कसंग्रहप्रतिपाद्यार्थप्रतिपादिकामित्यर्थः प्रसिद्धदीपिका यथार्थप्रकाशिका तथे
यमपि दीपिका तर्कसंग्रहप्रतिपादितार्थप्रतिपादिकेति स्वीयटीकाया अपि दीपिकात्वलाभात् निर्दोषत्वं
लभ्यते एतादृशीं टीकां कुर्वेऽहं करवाणीत्यर्थः इदानीं निधायेत्यादिमूलमवतारयति चिकीर्षितस्ये
ति कर्त्तुमिच्छाविषयस्येत्यर्थः मंगलस्य निष्फलत्वशंकाप्रयुक्तानादरणीयत्वशंकानिरासायाह निर्विघ्न
परिसमाप्त्यर्थमिति विघ्नध्वंसपूर्वकसमाप्तये इत्यर्थः तथा च समाप्तिं प्रति विघ्नध्वंसद्वारा मंगलस्य हेतु
त्वलाभान्नोक्तशंकावकाशः विघ्नध्वंसस्य द्वारत्वकथनेन त्रिक्षणावस्थायिमंगलस्य कालांतरभाविस
माप्तिसाधनत्वासंभवात् न दोषः नादृवस्यमिति शंका निरस्ता मंगलस्य सफलत्वमुक्त्वा ऽवश्यकर्त्तव्यत्व
माह शिष्टेति शिष्टाचारेणानुमितया श्रुत्या बोधिता कर्तव्यता यस्येति व्युत्पत्त्या तादृशकर्तव्यताव
दित्यर्थलाभः इदानीं मंगलस्य स्वरूपमाह इष्टदेवतेति इष्टदेवताविषयकनमस्काररूपमित्यर्थः सचन

५

मस्कारस्त्रिविधः कायिकोवाचिकोमानसिकश्चेति आद्यस्तु उरसाशिरसादृष्ट्येत्याद्यष्टांगसहितःप्रणा
मः द्वितीयः विश्वनाथायनम इत्यादिशब्दरूपः अंत्यस्तुत्वदवधिकापकर्षाश्रयोहं मदवधिकोत्कर्षा
श्रयस्त्वमित्याकारकज्ञानविशेषरूप इति बोध्यं शिष्यशिक्षार्थमिति शिष्या अप्येवं कुर्युरिति शिष्यानुग्रहा
येत्यर्थः निर्विघ्नस्मिन्तिनिर्विघ्नं कुर्वन्नित्यर्थः तादृशमंगलप्रतिपादकवाक्यग्रन्थारम्भ इति यावत् शास्त्रप्रसे
पस्यसमानकालीनत्वमर्थः तस्य प्रतिजानीत इत्यत्र प्रतिज्ञायामन्वयः चिकीर्षितमिति कर्तुमिष्टाविष
यीभूतमित्यर्थः प्रतिजानीत इति शिष्यावधानायेत्यादिः प्रतिज्ञानुकूलकृतिमान् ग्रन्थकार इत्यर्थः तथाच
शिष्यशिक्षाफलकतादृशमंगलप्रतिपादकनिबन्धनकरणसमानकालीनशिष्यावधानफलकचिकी
र्षितग्रन्थकर्मकप्रतिज्ञानुकूलकृतिमान् ग्रन्थकार इति वाक्यार्थः फलित इति ननु निर्विघ्नपरिसमाप्त्य
र्थमिति ग्रन्थेन मंगलस्य समाप्तिसाधनत्वं प्रतिपादितं तन्न संभवतीत्याशंकते नन्वित्यादिना मंगलस्य समाप्ति कारणत्वं

८४:७४

न॰प्र॰
३

कारणत्वाभावः प्रत्यक्षसिद्ध इति यावत् योग्यानुपलब्धि कारणसत्त्वादिति शेषः ननु मंगले कारणत्वप्रसक्तौ
त्वात्तदभावरूपयोग्यानुपलब्धिस्तत्र बाधितेत्याशंकां तादृशप्रत्यक्षोत्पादकसामग्रीविघटकप्रदर्श
नेन परिहरति मंगले कृतेपीत्यादिना किरणावल्यादावित्यादिपदेन मंगले कृतेपि येषां ग्रन्थानां न स
माप्तिः तेषां संग्रहः समाप्त्यदर्शनादिति इदं तु समाप्त्यभावग्राहकयोग्यानुपलब्धिप्रदर्शनाय समाप्त्य
भावादित्यर्थः मंगलाभावेपीति मंगलरूपकारणाभावेपीत्यर्थः कादंबर्यादावित्यादिपदेन मंगला
करणेपि येषां ग्रन्थानां समाप्तिस्तेषां संग्रहः समाप्तिदर्शनादिति समाप्तेरित्यर्थः दर्शनं ग्रहणं स
माप्तेः प्रत्यक्षप्रमाणोपन्यासाय यथा कृते समाप्तिदर्शनं प्रति मंगलस्य पूर्वं हेतुत्वाप्रतिपादनात्
तत्त्वखण्डनाय व्यभिचारप्रदर्शनस्यासांगत्यापत्तेरिति बोध्यं अन्वयव्यतिरेकव्यभिचारादिति अन्वय
योः कारणकार्ययोः व्यतिरेकयोः कारणाभावकार्याभावयोर्व्यभिचारात् अव्यापकत्वादित्यर्थः तद्

हात इति फलितार्थः तथा च स्वस्वव्याप्ये तरयावत्कारणसत्वे यत्सत्वेऽग्रिमक्षणेऽवश्यं यदुत्पत्तिः य
द्भावेऽवश्यं यदनुत्पत्तिस्तद्भाव इति व्यापकत्वघटितान्वयव्यतिरेकसहचारग्रहसहकृतेनेंद्रियेणग्र
गत्वेसमाप्तिसाधनत्वं ग्राह्यं प्रकृते सहकारिकारणीभूतनिरुक्तसहचारग्रहप्रतिबंधकान्वयव्यति
रेकव्यभिचारग्रहसत्वेन तादृशसहकारिकारणानुत्पन्नौ तत्सहकृतेन्द्रियरूपकारणाभावान्मंग
लेसमाप्तिसाधनताप्रत्यक्षं नसंभवतीतिभावः न्नत्र घटाद्युत्पादकयावत्कारणसत्वाकाले रासभा
दिसत्वेऽग्रिमक्षणेघटाद्युत्पत्त्यारासभादेर्घटादिकारणत्वापत्तिवारणाय सहकारिकारणशरीरे
व्यतिरेकदलं एवं च रासभाद्यभावे घटाद्यभावाभावान्नोक्तदोषः कपालाकाशसंयोगतद्व्याप्य
कपालद्वयसंयोगातिरिक्तयावद्घटकारणसत्वे कपालाकाशसंयोगाभावे घटानुत्पत्त्या कपाला
काशसंयोगस्य घटकारणत्वापत्तिवारणाय एतच्छरीरेऽन्वयदलं एवं च कपालाकाशसंयोगतद्व्या

२

7

न·प्र·
६

यकपालद्वयसंयोगेतरयावत्कारणसत्त्वेकपालद्वयसंयोगशून्यकालेकपालाकाशसंयोगस
त्त्वेपिघटोत्पत्त्यभावान्नोक्तदोषः तादृशयावत्कारणसत्त्वेकपालाकाशसंयोगसत्त्वेकदाचित्कपा
लद्वयसंयोगसत्त्वेघटोत्पत्त्याकपालाकाशसंयोगस्यतदापत्तिः अतोन्वयदलेव्यापकत्वार्थक
मवश्यमितिपदं एवंचतादृशयावत्कारणसत्त्वेकपालद्वयसंयोगसत्ताशून्यकालेपिकपाला
काशसंयोगसत्त्वेनतत्रतद्धानीघटानुत्पत्त्याव्यापकत्वघटितान्वयदलाभावान्नकपालाका
शसंयोगस्यतदापत्तिः यावत्कारणसत्त्वेदण्डव्यतिरेकस्याप्रसिद्धत्वात्तस्यकारणत्वोपप
त्तिः अतः स्वेतरेतिदण्डेतरचक्रभ्रम्यादिघटितयावत्कारणसत्त्वेदण्डव्यतिरेकेपिघटव्यतिरे
काभावाद्दण्डस्यकारणत्वानुपपत्तिरतः स्वव्याप्येतरेतिघटप्रागभावघटयोरेककालावृत्ति
तयाघटप्रागभावसत्ताकालेघटोत्पत्त्यसंभवान्नस्यघटकारणत्वानुपपत्तिरतस्तद्दलेऽपि

चिकारणे

मक्षणे रस्तूक्तं तादृशयावत्कारणसत्वे ~~दण्डसत्वे~~ दण्डसत्वेप्यग्रिमक्षणे चक्रे घटोत्पत्तावपि घट
स्यास्थितभावाद्दण्डस्य तदनुपपत्तिरतोन्वयदले यत्सत्वमित्यपहाय यदुत्पत्तिरित्युक्तं तादृशया
वत्कारणे चक्रे दण्डाभावेपि घटस्यास्थितिसंभवे न तदभावाभावात्तस्य तदनुपपत्तिरतो व्यतिरे
कदले पदभावद्यत्यनेन्त्वा यदुत्पत्त्यभाव ~~[illegible]~~ इत्युक्तमिति ध्येयं क्वचित्तु स्तुकेऽन्वय
व्यतिरेकाभ्यां व्यभिचारादिति पाठः तत्र तृतीयायाश्चभेदार्थकत्वांगीकारेणान्वयात्मकव्यभिचार
~~[illegible]~~ज्ञानादितियावत् अन्वयात्मकव्यभिचारश्च कारणनिरूपितकार्यनिष्ठाव्यापकत्वं व्यति
रेकात्मकव्यभिचारश्च कारणाभावनिरूपितकार्याभावनिष्ठाव्यापकत्वं तज्ज्ञानादितिफलिता
र्थं एवं पर्यवसानमिति बोध्यं विघ्नबाहुल्यादिति बहूनां विघ्नानां सत्वादित्यर्थः समाप्त्यभाव
इति समाप्तिरूपकार्यानुत्पत्तिरित्यर्थः ग्रन्थादौ हि रेवेति ग्रन्थादौ नान्वि वन्धन महत्वेवेत्यर्थः का

व्यतिरेकात्मकव्यभिचारात्तज्ज्ञा

इति पूर्वोक्तार्थ

10

न्‍.प्र.

५

दंडवर्यादौ तन्निबंधनमेव न कृतं मंगलं तु कृतमेवेति फलितार्थः अतो न व्यभिचार इति तथा च किरणाव
ल्यादौ कतिपयमंगले न कृतिपयविघ्नध्वंसोत्पन्नावपि केषांचिद्विघ्नानां सत्त्वेन विघ्नत्वावच्छिन्नप्रतियो
गिताकाभावस्य तत्रावर्तमानतया किरणावल्यादिग्रंथकर्तरि स्वस्वव्याप्येतरयावत्कारणं नगनविघ्न
त्वावच्छिन्नाभावस्यासत्त्वेन तादृशयावत्कारणसत्त्वेऽग्रिमक्षणे कार्यानुत्पन्नावेव व्यभिचारस्याप्राप
कृते यावत्कारणसत्त्वेन समाप्त्यनुत्पन्नावपि नान्वयव्यभिचारप्रसक्तिः कादंबर्यादिग्रंथकर्तरि मंग
लसत्त्वेन तदभावात् समाप्त्यनुत्पन्नावपि न व्यतिरेकव्यभिचारप्रसक्तिरिति भ्रान्तस्य तादृशव्यभिचा

भावा

ररूपप्रतिबंधकासत्त्वेन नियतान्वयव्यतिरेकसहचारज्ञानोत्पन्नो बाधकाभावात्तत्सहकृतेनेंद्रिये
ण मंगले समाप्तिकारणताप्रत्यक्षसंभवे न तदभावरूपयोग्यानुपलब्धिविरहात् सहकारिकारणा
भावेन मंगले समाप्तिकारणत्वाभावो नेंद्रियवेद्य इति भावः मंगले समाप्तिकारणत्वं प्रत्यक्षप्रमाणागम्यमि

अ

५

त्ति उपलक्षणं तस्यानुमानेनापि ग्राह्यत्वसंभवात् तथाहि मंगलं समाप्तिसाधनं समाप्तिकामनया
शिष्टैरनुष्ठीयमानत्वात् यद्यत्कामनया शिष्टैरनुष्ठीयते तत्तत्साधनं यथा ज्योतिष्टोमः स्वर्गसाधनं स्व
र्गकामनया वैदिकैरनुष्ठीयमानत्वस्य चैत्यवंदनेपि सत्वात् तत्र साध्याभावेन व्यभिचारवारणाय शि
ष्टैरित्युक्तं शिष्टत्वं चात्र दृष्टसाधनत्वांशे भ्रांतिरहितत्वं तथा च तादृशभ्रांतिरहितसमवेतानुष्ठान
विषयत्वं लाघवात्तादृशभ्रांत्यजन्यानुष्ठानविषयत्वं वा हेतुरिति पर्यवसितं एवं दनादिविषयक
बौद्धानुष्ठानस्येष्टसाधनत्वांशे भ्रमजन्यत्वान्न व्यभिचारः नच नास्तिकादिग्रंथे मंगलाभावेपि सम
प्तत्वान्मंगलस्य समाप्तिकारणत्वं बाधितं एवं च बाधितार्थसाधकत्वाद्धेतोर्बाधितत्वमिति वाच्यं
नास्तिकादिग्रंथे विघ्नध्वंसद्वाराजन्मांतरीयमंगलेनैव समाप्युत्पत्तिस्वीकारेण मंगले समाप्तिसाध
नत्वस्याबाधिततया तत्साधकहेतोरप्यबाधितत्वात् नच तथापि मंगले जन्मांतरीयमंगलसत्संदेहाहि

वचैत्यवं

न·प्र·
६

तसमाप्तिसाधनत्वसंदेहसंभवेनहेतोऽपिव्यभिचारसंदेहसंभवात् व्याप्तिनिश्चयरूपानुमान
मेवनावतरतीतिवाच्यंईदृशव्यभिचारसंशयस्यपक्षेसाध्यसंशयाधीनतयाव्याप्तिनिश्चयाप्र
तिबंधकत्वात्साध्याभाववत्तांशेनिर्णयात्मकवृत्तित्वांशेसंशयनिश्चयसाधारणव्यभिचारज्ञान
मात्रस्यैवव्याप्तिनिश्चयप्रतिबंधकत्वस्यसकलतांत्रिकानुमतत्वात् अन्यथाधूमेपिपर्वतेवह्नि
संदेहाहितव्यभिचारसंशयसंभवाद्धूमेपिवह्निनिरूपितव्याप्तिनिश्चयानुत्पत्तिप्रसंगः नचानु
कूलतर्कविरहविशिष्टव्यभिचारशंकायाएवव्याप्तिनिश्चयप्रतिबंधकतयाप्रकृतेधूमवह्न्योःका
र्यकारणभावरूपानुकूलतर्कसत्वेननधूमेव्याप्तिनिश्चयानुत्पत्तिरितिवाच्यंसर्वज्ञगोतमकणा
दाद्याचाररूपस्यशिष्टाचारानुमितश्रुतिरूपस्यवानुकूलतर्कस्यात्रापिसत्वेनव्याप्तिनिश्चयोत्पत्तौ
बाधकाभावात् तस्मान्मंगलेसमाप्तिसाधनत्वमनुमानेनापिग्राह्यमित्यपिबोध्यंएतेननास्तिका

12

न० प्र०

६

कारणतावच्छेदकत्वं एवं च भोजनादेः साक्षादेवनरकजनकत्वे न तदुन्मत्तत्वरूपालौकिकत्वाभा
वान्न व्यभिचार इति भावः रात्रिश्राद्धादाविति शास्त्रनाम्ना अर्हत्प्रणीत रात्रिश्राद्धादावित्यर्थः आदिना शत्रुना
शकमंत्रजपादेः परिग्रहः अविगीतेति ति अविगीतत्वं बलवदनिष्टाननुबन्धित्वं एवं च तादृशरात्रि
श्राद्धादेः निरुक्तालौकिकत्वेपि नरकसाधनत्वेन बलवदनिष्टाननुबन्धित्वरूपाविगीतत्वाभावान्न
व्यभिचार इति भावः नन्वत्र शिष्टपदमनर्थकं अलौकिकत्वाविगीतत्वोभयसमानाधिकरणविषय
तानिरूपकाचारस्य शिष्टमात्रसमवेतत्वादित्याशंकामिष्टापत्त्या परिहरति शिष्टपदं स्पष्टार्थमिति नि
रुक्तोभयसमानाधिकरणविषयतानिरूपकाचारः शिष्टमात्रसमवेत इति स्फुटप्रतिपत्त्यर्थमेवेत्यर्थः
न तस्य प्रयोजनान्तरमस्तीति भावः ननु शिष्टपदानुपादाने निरर्थकजल्पताडनादेरपि निरुक्तहेतुम
त्वात्तत्र साध्याभावेन व्यभिचार इत्याशंकां तत्र हेतुघटकाविगीतत्वविशेषणसत्त्वप्रतिपादनेन परिहर

१३

६

दिग्रंथसमाप्तिस्थले जन्मांतरीयमंगलसंदेहान्मंगले समाप्तिसाधनत्वसंदेहसंभवेनतादृशसं
देहस्यकारणताप्रत्यक्षप्रतिबंधकतयानियतान्वयव्यतिरेकसहचारज्ञानसहकृतेंद्रियग्राह्य
त्वेसमाप्तिसाधनत्वस्यदुर्घटमितिदूषणमयास्तं अनुमानेनैवमंगलेसमाप्तिसाधनत्वसोप
पादितत्वात् ननुनिर्विघ्नपरिसमाप्त्यर्थंग्रंथादौमंगलमेवकर्त्तव्यमित्यत्रमानाभावः प्रायश्चित्ता
दिनापिविघ्ननाशसंभवात्ततः समाप्त्युत्तेष्टेत्याशयेनशंकतेनन्वित्यादिना मंगलस्येति ग्रंथादा
वित्यादिः कर्त्तव्यत्व इतिनियमेनकर्त्तव्यत्व इत्यर्थः प्रायश्चित्तादेरकर्त्तव्यत्वे इति किंप्रमाणमितिप्रमा
णाभाव इत्यर्थः शिष्टाचारलिंगकमनुमानमितिप्रकारमाह तथाहीत्यादिना अलौकिकेति अलौ
किकत्वेसत्यविगीतत्वेसतिशिष्टाचारविषयत्वादित्यर्थः भोजनादाविति आदिनामालिन्यनिवर्त्तकस्ना
नादेःपरिग्रहः अलौकिकेतीति अलौकिकत्वंफलनिष्ठकार्यतानिरूपितव्यापारसंबंधानवच्छिन्न

14

15

घ

तिनकुर्यादितितयाचताहृशाजल्लताडनादेर्निषिद्धत्वाद्विगीतत्वेनतत्राविगीतत्वघटितहेत्वभावाद्वेवत
त्वसाध्याभावेव्यभिचारवारकेशिष्टपदं व्यर्थमेवेतिभावः एताहृशानुमानेनवेदबोधितकर्तव्यत्वरूपसा
ध्यटकस्यानुमितौताहृशश्रुतिः कीहृशानुपूर्वीकेत्याकांक्षायांपठ्यमानवेदस्याध्यापकोक्तिपरंपरया
स्मानुपूर्वीनिर्णयेवदनुमितवेदस्यापि सर्वज्ञगौतमकणादादिभिःसमाप्तिकामोमंगलमाचरेतेतिस्मानु
पूर्वीविशिष्टश्रुतेरेवतत्रलिखितत्वात् ताहृशश्रुतिरेवासिध्यतिएवंचताहृशश्रुत्यासमाप्तिकामस्यग्रन्था
दौमंगलस्यैवकर्तव्यत्वप्रतिपादनान्नाहृशश्रुत्यन्यथानुपपत्याग्रन्थादौसमाप्तिकामनयामंगलमेवक
र्तव्यंनप्रायश्चित्तादिकंनसमाप्तिकामः प्रायश्चित्तमाचरेतेतिकेनचिल्लिंगेनकेनचित्पुरुषेणानुमितत्वात्
नचतथापिशिष्टाचारेणश्रुतिरेवानुमेयाआवश्यकत्वात् नतुश्रुतिबोधितकर्तव्यतापिव्यर्थत्वादिति
वाच्यं शिष्टाचारलिंगेनश्रुतिमात्रानुमितेरसंभवात् तथाहिशिष्टाचारस्यसमवायेनहेतुत्वेश्रुतेःस्वानु

न·प्र·
८

म

कृत्नकृतिमत्वसंबंधेनसाध्यत्वेचमत्कसमवेतभोजनाद्याचारस्यनिरुक्तशिष्टसंवेताचारत्वेनतस्यम्
कादौसत्वात् तत्रनिरुक्तसंबंधेनसाध्याभावात् अभिचारापत्तिः मूकस्त्रीबालस्यद्राद्यसमवेतशिष्टा
चारस्यहेतुत्वमंगीकृत्तेऽत्रव्यभिचारवारणेपिसर्वेषध्यापकेऽसमवायेनतादृशहेतुसत्वात्तत्वेन
संबंधेनमंगलस्यकर्तव्यताबोधकश्रुतेरभावात्तत्रैषतादवस्थ्यंस्वरूपविषयत्वोभयघटितसा
मानाधिकरण्यसंबंधेनालौकिकत्वाविगीतत्वोभयविशिष्टशिष्टाचारस्यहेतुत्वेमंगलनिष्ठलौकि
कत्वादे रात्मन्यभावात्तत्रविशिष्टहेतोरभावेनात्मनःपक्षत्वासंभवः मंगलस्यपक्षत्वमंगीकृत्यनि
रुक्तहेतुनाप्रतिपाद्यतासंबंधेनश्रुत्यनुमानेनमंगलंप्रमेयमित्यादिश्रुतिसिद्धिमादायार्थांतरदो
षापत्तिः तथामंगलस्यकर्तव्यताप्रतिपादनात्तस्मान्मंगलेनिरुक्तहेतुनास्वनिष्ठकर्तव्यताबोध
कश्रुतिबोधितकर्तव्यताकत्वंवाऽवश्यंसाधनीयमितिनवैयर्थ्यमंशेकेतिकू अत्रस्वप्रतियोगिच

दि

श्रुतिकत्वं

16

८

रमवर्णानुकूलकृतिमत्त्वसंबंधेन चरमवर्णध्वंसरूपसमाप्तिं प्रतिज्ञाश्रयतासंबंधेन ज्ञानरूपमंग
लस्य स्वानुकूलकृतिमत्त्वसंबंधेन वस्तुनिर्देशरूपमंगलस्य च हेतुत्वं वाच्यं स्वप्रतियोगिचरमव
र्णावच्छेदकतासंबंधेन समाप्तिं प्रति समवायसंबंधेन क्रियाविशेषरूपमंगलस्य हेतुत्वं वाच्यं ते
न चरमवर्णध्वंसरूपसमाप्तेराकाशनिष्ठत्वेपि न क्षतिः केचित्तु चरमवर्णरूपैव समाप्तिर्वाधकाभा
वात्कार्यतावच्छेदकलाघवाच्चेत्याहुः अपरे तु आनुपूर्वीविशेषावच्छिन्नचरमवर्णज्ञानं तादृश
चरमवर्णध्वंसज्ञानं वा समाप्तिर्वाधकाभावात् समवायस्य कार्यतावच्छेदकसंबंधत्वसंभवेन
लाघवाच्चेत्याहुः मतद्वयमपीदं इदानीमपि समाप्तिविशिष्टकृतिसत्त्वात्त्रिकव्यवहारानुप
पत्तेः चरमवर्णस्य तत्तद्ध्वंसविषयकज्ञानस्य वा इदानीमवर्तमानत्वादिति बोध्यं अधिकं त्वस्मत्ते
तमञ्जूषावलीप्रभायामनुसंधेयं श्रीपदार्थचन्द्रं विभजत इति अत्र विपूर्वकभजधातोरवान्तरधर्मप्र

न॰प्र॰
४

कारकज्ञानानुकूलव्यापारोऽर्थः आख्यातस्य कृतिरर्थः पदार्थानित्यत्र द्वितीयायास्तु विषयकधातुयो
गाद्विशेष्यतास्य विषयत्वमर्थः अस्य धात्वर्थैकदेशज्ञानेऽन्वयः एवंच पदार्थविशेष्यकपदार्थता
वान्तरधर्मप्रकारकज्ञानानुकूलव्यापारानुकूलकृतिमान् ग्रंथकार इति शाब्दबोधः एवंप्रेपिन म
नु मंगलकरणानन्तरं पदार्थसामान्यमुद्दिश्य मूले विभागकरणं न संभवति विभागं प्रतिउद्देश्य
ज्ञानस्य हेतुत्वेन तदभावादिति चेन्न क्रियते तर्कसंग्रह इति प्रतिज्ञाघटकतर्कपदेनैव पदार्थसामा
न्यस्योपस्थितत्वेन उक्तदोषाप्रसक्तेः ननु सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मजिज्ञासांप्रति हे
तुतया लक्षणात्मकसाधारणधर्मप्रकारकज्ञानाभावात् कियंतः पदार्था इति जिज्ञासानुत्पत्त्या वि
भागकरणमनुचितं अजिज्ञासितत्वेनार्थान्तरदोषापत्तेरित्याशंकां लक्षणप्रदर्शनेन परिहरति
पदस्येति पदार्थ इति नैकं पदं किंतु वाक्यमिति बोधनाय विग्रहप्रदर्शनं तस्यैकपदत्वे पदार्थपदस्य

18

कोशेनाभिधेयेशक्तप्रतिपादनात् असांगत्यापत्तेरिति अत्रन्येति इत्याकारकविग्रहबोधार्थकपदा
र्थइतिवाक्यघटकार्थपदेनेत्यर्थः अत्र इतिवाक्यघटकार्थपदेनेत्यर्थः लभ्यतइति अर्थोभिधेयइत्या
दिकोशेनार्थपदस्याभिधेयत्वावच्छिन्नशक्तिप्रतिपादनादितिभावः इदमुपलक्षणं अनुगतावित्यनु
शासनबलात्गत्यर्थकोधातुः तस्य गुणेकृते अरितिधातुनिष्पत्तिः तदुपरियप्रत्ययेकृतेअर्यइतिशाब्दे
निष्पन्नइतिगत्यर्थकधातूनां ज्ञानार्थकत्वनियमेन विषयत्वार्थकयप्रत्ययान्तार्यशब्देन ज्ञानविषयत्वं
लभ्यतइति ज्ञानविषयत्वमपिपदार्थसामान्यलक्षणं प्रतिपाद्यतासंबंधेनपदार्थशब्दवत्वंलक्ष्यता
वच्छेदकमितिबोध्यं मूलेद्रव्येत्यादि अत्राभावपदस्यद्रव्याद्यभावान्तान्यतमत्वविशिष्टलक्षणाद्रव्या
दिपदानितात्पर्यग्राहकाणि एतेन कस्मिन्नपिपदार्थेद्रव्याद्यभेदाभावादसंगतिदोषस्यनावकाशः
एवंचसमानविभक्तिकपदद्वयसमभिव्याहारबलादभेदसंबंधेनद्रव्याद्यभावान्तान्यतमत्वविशिष्टः

न॰प्र॰
१०

पदार्थाः इत्यन्वयबोधः तत्र सप्तपदस्य प्रयोजनं वक्तुमाक्षिपति दीपिकायां नन्वित्यादिना विभागादेवेति
द्रव्यगुणेत्यादिद्वंद्वसमभिव्याहृतबहुवचनादेवेत्यर्थः तथा च द्वंद्वसमभिव्याहृतबहुवचनस्य द्वंद्वप्रति
पाद्यतावच्छेदकधर्माश्रयसंख्यावाचकत्वनियमोवश्यमंगीकार्यः अन्यथा रामलक्ष्मणभरतशत्रुघ्ना इत्यत्र बहु
वचनेन द्वित्वादिबोधापत्त्याऽनुभवविरोधापत्तेः एवं च प्रकृते द्वंद्वप्रतिपाद्यद्रव्याद्यभावांतसमुदायपर्यवस्न
संख्यावाचकतायास्तादृशद्वंद्वसमभिव्याहृतबहुवचनस्यावश्यं स्वीकार्यतया तादृशसंख्यासप्तत्वसंख्ये
वेति बहुवचनेन तत्सिद्धिरिति भावः सप्तपदग्रहणं व्यर्थमिति मूलस्य सप्तपदं निष्प्रयोजकमित्यर्थः सप्त
त्वोपस्थितेर्बहुवचनादेव संभवादिति भावः अधिकसंख्याव्यवच्छेदार्थत्वादिति अष्टत्वसंख्यापर्याप्त्यधि
करणसमुदायनिषेधार्थत्वादित्यर्थः अष्टौ पदार्था न संतीति ज्ञापनायेति यावत् सप्तपदमावश्यकमिति शे
षः यथा च ब्राह्मणमानयेत्यादिवाक्यघटकैकवचनान्तब्राह्मणपदेनैकत्वविशिष्टब्राह्मणस्यानय

२०

न ४

१०

ननिरूपितकर्मत्वोपस्थितावपि द्वितीयं नानयेत्यर्थलाभः एकं ब्राह्मणमानयेत्यादौ संख्यावाचकैकादिप
दानामितरं निषेधार्थकत्वात् द्वितीयं नानयेत्यर्थलाभः तथा द्रव्येत्यादि द्वंद्वसमभिव्याहृतबहुवचनेन स
प्तत्वरूपबहुत्वसंख्योपस्थितावपि अष्टत्वसंख्यापर्याप्त्यधिकरणसमुदायनिषेधालाभात्तदर्थं सप्तपदमा
वश्यकमिति भावः ननु द्रव्याद्यभावांतपदार्थेषु सप्तत्वसंख्यापर्याप्तिवत् परार्धपर्यन्तसंख्याया अपि
तादृशपदार्थपर्याप्तनयाष्टत्वादिसंख्यापर्याप्त्यधिकरणपदार्थानां सत्त्वात्तादृशपदार्थनिषेधः स
प्तपदसहस्रेणापि कर्तुं न शक्यत इति चेन्न अष्टत्वसंख्यापर्याप्त्यधिकरणपदार्थ निषेधार्थं सप्तपदमि
ति न ब्रूमः किन्तु सप्तत्वसंख्याधिकसंख्यापर्याप्त्यधिकरणपदार्थविभाजकधर्मनिषेधार्थं एवं च
मूले सप्तपदार्था इत्यस्य सप्तपदार्थविभाजकधर्मान्यतमविशिष्टा इत्यर्थः तथा च संख्यावाच
कैकादिपदानामितरनिषेधबोधतात्पर्यग्राहकतया एकघटवद्भूतलमित्यादौ द्वितीयघटाभाव

बोधवत् सप्तपदार्थविभाजकधर्मान्यतमविशिष्टाइत्यनेनाष्टमपदार्थविभाजकधर्मशून्यात्इत्यर्थला
भात् व्यवच्छेदसंगतिः एतदभिप्रायाणैव दीपिकाकारेण धिकसंख्याव्यवच्छेदार्थत्वादित्युक्तेर
ति ध्येयं अतिरिक्तः पदार्थ इतिअतिरिक्तोष्टमः पदार्थः पदार्थविभाजकधर्म इत्यर्थः प्रमितो वा
न वेति प्रमाविषयत्ववान् तदभाववान् वेत्यर्थः ननु संशयधर्मिणोष्टमपदार्थविभाजकधर्मस्य
प्रमितत्वाभावरूपकोट्यंनरस्य चाप्रसिद्धत्वेन धर्मितावच्छेदकप्रकारकनिर्णयाभावात्को
टिद्वयोपस्थित्यभावाच्च कथं विकल्पन इति चेन्न प्रकृतेऽष्टमत्वं द्रव्यत्वाद्यभावत्वां न पदार्थविभा
जकधर्माणां प्रत्येकप्रतियोगिकभेदसप्तवत्वं द्रव्यत्वाद्यभावत्वान्ततादृशधर्मान्यतमत्वावच्छिन्नप्रति
योगिताकैकभेदवत्त्वं वा तथा च तादृशभेदविशिष्टः पदार्थविभाजकधर्मः प्रमितो वा न वा पदा
र्थविभाजकधर्मत्वेन प्रमितो वा न वा अथवा पदार्थविभाजकधर्मोष्टमः प्रमितो वा न वा निरुक्त

भेदवत्त्वरूपाष्टमत्वेन प्रमितो वा न वेत्यत्र तान्यधीत धर्मिप्रसिद्ध्या कोटिद्वयप्रसिद्धेश्च विकल्पसं
गतिरिष्टार्थत्लाभश्चेति बोध्यं अस्मद्गुरुचरणास्तु अतिरिक्तः पदार्थः प्रमितो वा न वेति प्रमितः पदा
र्थः पदार्थविभाजकधर्मः अतिरिक्तो न वेत्यर्थः [illegible] अतिरिक्तो न वेत्यर्थः धर्म्यप्रसिद्धिशं द्वि २
कानिरासाय तादृशधर्मे प्रमितत्वमुपात्तं न तु धर्मितावच्छेदककोटौ तस्यापि निवेशः गौरवात् प्रयोज
नाभावाच्च अतिरिक्तत्वं चात्र द्रव्यत्वाद्यभाववत्त्वान्तान्यतमाधिकरणवृत्तित्वं तथा च पदार्थविभाजकध
र्मः द्रव्यत्वाद्यभाववत्त्वान्तान्यतमाधिकरणवृत्तित्वं न वेत्यर्थस्लाभात् धर्मितावच्छेदकरूपेण धर्मिप्रसिद्ध्या
गगनाद्यंतर्भावेन कोटिप्रसिद्ध्या विकल्पसंगतिरिष्टार्थत्लाभश्चेति प्रमितस्येति विद्यमानस्येत्यर्थः प्रति
योगिप्रमितिं विनेति प्रतियोगिनः कालसंबंधं विनेत्यर्थः निषेधानुपपत्तेरिति शशशृंगस्येव निषेधास
भवादित्यर्थः इति व्याचक्रुः पदार्थत्वमिति पदार्थविभाजकधर्मीयवंतः तावदन्यतमत्वावच्छिन्नमित्यर्थः

द्रव्यादिसमान्यतमत्वव्याप्यमिति अत्रसप्तपदं द्रव्याद्यभावं तत्ताभाय न तु व्यापकतावच्छेदककोटौ स
प्तत्वस्यापि प्रवेशः गौरवात्प्रयोजनाभावाच्च एवं च द्रव्याद्यभावान्तान्यतमत्वनिरूपितव्याप्यत्वलाभ
ति व्यवच्छेदार्थत्वादिति इत्थं कारकनिश्चयफलकत्वादित्यर्थः सप्तपदग्रहणमिति अत्रावश्यकमिति शेषः
ननु यावत्पदार्थविभाजकधर्मान्यतमत्वावच्छिन्ननिष्ठद्रव्याद्यभावान्तान्यतमत्वव्याप्यत्वबोधकत्वं
न शक्यासप्तपदस्य न च तल्लक्षणघटकतद्बोधे त्विति वाच्यं तादृशव्याप्यत्वे शक्यसंबंधरूपलक्षणाया अ
भावात् यथाकथंचिच्छक्यसंबंधोपपादनेन तद्बोधोपपादनेपि वक्ष्यमाणसप्तत्वबोधानुपपत्तेः स
कृदुच्चरितत्वात्तथा इति चेन्न वयं हि सप्तपदस्य तादृशतादृशव्याप्यत्वबोधकत्वमाचक्ष्महे येनोक्तदो
षः प्रसज्यते किंतु उद्देश्यविधेयभावमहिम्नैव तादृशबोधः तथा हि यावत्पदार्थविभाजकधर्मान्यतमा
त्वावच्छिन्नोद्देश्यकद्रव्याद्यभावान्तान्यतमत्वविधानात् अनुमिताविव शाब्दबोधेपि असति प्रतिबंधके विधे

सकृदुच्चरितः श
ब्दः एकमेवार्थं
गमयतीति
न्यायः २

२

कमानसप्रत्यक्षमनायासेन संभवतीति दीपिकाकर्तुरिति गदाभिप्रायइति ध्येयं ननु तथापि निरू
क्तव्याप्तिनिश्चयसंपादकं सप्तपदं व्यर्थमेव तादृशव्याप्तिनिश्चयस्येवानपेक्षितत्वादिति चेन्न ता
दृशव्याप्तिनिश्चयस्यानपेक्षितत्वे प्रमाणादिषोडशपदार्थान् प्रत्येकं पक्षीकृत्य द्रव्याद्यभावा
न्यान्यतमत्वरूपद्रव्याद्यन्तर्भूतत्वस्य पदार्थविभाजकधर्मवत्त्वहेतुना द्रव्यादिदृष्टान्तेन साध
नासंभवेन षोडशपदार्थानां द्रव्याद्यन्तर्भूतत्वासिद्धिप्रसंगात न चेष्टापत्तिः षोडशपदार्थानाम
त्रैवान्तर्भूतत्वादिति काणादसूत्रविरोधापत्तेरिति दिक् अनयैव दिशा द्रव्यादिविभागवाक्यघटक
नवादिपदग्रहणप्रयोजनमप्यूह्यं ननु द्रव्याद्यभावान्यान्यतमत्वं न तावत्तादृशाभावानां समुदायत्वा
वच्छिन्नप्रतियोगिताकभेदावच्छिन्नप्रतियोगिताकभेदवत्त्वं एको न द्वाविति प्रतीत्या एकस्मिन्नुभ
यत्वावच्छिन्नप्रतियोगिताकभेदवत् एको न सप्तेति प्रतीत्या प्रत्येकमेकस्मिन् तादृशभेदसत्त्वेन तस्य

25

पेउद्देश्यतावच्छेदकव्यापकत्वस्य संसर्गविधया भाननियमेन प्रकृते द्रव्याद्यभावांतान्यमत्वरूप
पे२ विधेयावत्पदार्थविभाजकधर्मान्यतमत्वावच्छिन्ननिरूपितव्यापकत्वबोधे जाते तद्वत्ताउत्त
रकाले निरुक्तोद्देश्यतावच्छेदके निरुक्तविधेयव्याप्यत्वस्यापि मानसप्रत्यक्षसंभवात् एवं च पदार्थवि
स्य॥ भाजकधर्माः सप्तवान्यूनावेति संशयं निरुक्तव्याप्यत्वसंशयजनकसामग्रीकत्वेन तादृशसंशया
ता धीनस्य निरुक्तोद्देश्यावच्छेदके निरुक्तविधेयव्याप्यत्वसंशयस्य ग्राह्यसंशयविधया तादृशमानस
प्रत्यक्षात्मकनिश्चयप्रतिबंधकतया तादृशसंशयानुत्पादाय सप्तपदमुपात्तं एवं च सप्तपदेन पदार्थ
विभाजकधर्मे सप्तत्वोपस्थितौ न्यूनत्वाभावोपस्थितौ च पदार्थविभाजकधर्माः सप्तवाऽन्यूनावेत्याका
रकस्य सप्तत्वतदभावकोटिकस्य न्यूनत्वतदभावकोटिकस्य च संशयस्य सामग्र्यभावेनानुत्पत्तौ
तदधीनव्याप्यत्वसंशयस्याप्यनुत्पत्ताप्रतिबंधकत्वलेशाभावेन तादृशव्याप्यत्वप्रकारकनिर्णयात्म

पदस्य द्रव्यविभाजकधर्मान्यतमावच्छिन्नार्थकत्वात् नवैवेति पदोपस्थितनवत्वसंख्याया एवकारार्थद
शत्वादिसंख्याभ्यन्यत्वस्योक्तदोषवारणाय द्रव्यविभाजकधर्म एवान्वयावश्यकत्वात् च तादृशान्यतमाभि
न्नानि दशत्वसंख्याभ्यन्यनवत्वसंख्याविशिष्टद्रव्यविभाजकधर्मान्यतमविशिष्टानीति न द्रव्याणीति
वाक्यप्रतिपादितोर्थः द्रव्यविभाजकधर्मे नवत्वविशेषणप्रयोजनं तु पदार्थविभाजकधर्मे सप्तविशेषण
दिशा ज्ञेयमिति हृदयं अत्र दशत्वसंख्याविशिष्टतमस्त्वरूपद्रव्यविभाजकधर्माङ्गीकर्तृमीमांसकमत
निराकरणाय प्रवृत्तेन नवैवेत्येवकारः प्रयुक्त इति स्फुटीकरणाय आदौ तन्मतमुपन्यस्यति दीपिकायां न
न्वित्यादिना तमसो दशमद्रव्यस्येति दशमत्वाश्रयतमस्त्वरूपद्रव्यविभाजकधर्मावच्छिन्नस्येत्यर्थः क
कथं नवैव द्रव्याणीति नवत्वसंख्यापर्याप्त्यधिकरणद्रव्यविभाजकधर्मान्यतमवन्तीति कथमि
त्यर्थः द्रव्यविभाजकधर्मे नवत्वसंख्यापर्याप्तिः कथमिति फलितोर्थः ननु तमसो द्रव्यत्वे प्रमाणाभा

केवलान्वयितयाताद्दशभेदावच्छिन्नप्रतियोगिताकभेदाप्रसिद्धेः नापि द्रव्याद्यभावांन्तानांप्रत्येकध
भावच्छिन्नप्रतियोगिताकभेदसमुदायवद्भिन्नत्वं तादृशसमुदायवतोऽप्रसिद्धत्वेन तादृशसमुदायव
द्भिन्नत्वस्य सुतरामप्रसिद्धत्वादिति चेन्न द्रव्यत्वाद्यभाववत्त्वान्तानांप्रत्येकावच्छिन्नप्रतियोगिताकभेदस
मुदायत्वावच्छिन्नप्रतियोगिताकात्यन्ताभाववत्त्वस्य तदर्थत्वात् न दोषः वस्तुतस्तु द्रव्याद्यभावान्तान्य
नमत्वं द्रव्यत्वाद्यभाववत्त्वांताद्यन्यतमासमानाधिकरणम् स त्वं द्रव्यत्वाद्यभाववत्त्वान्तान्यतमवत्त्वं वाल
घवादिति प्रतिभाति द्रव्याणीति उद्देशक्रमानुसारात्प्रथमनित्यादिविभजनरीति अवान्तरधर्मप्रकारक
ज्ञानानुकूलव्यापारानुकूलकृतिमानित्यर्थः मूलेतत्र द्रव्याणीति सप्तपदार्थघटकप्रथमोद्दिष्टद्रव्याणि
त्यर्थः पृथिव्यवित्यादि अत्राप्युक्तदोषवारणाय चरममनःपदस्य पृथिव्यादिमनोऽन्तान्यतमत्वावच्छे
लक्षणयाऽऽवश्यकत्वात् तादृशान्यतमाभिन्नानीत्यर्थलाभः न चैव द्रव्याणीत्यन्वयबलात् द्रव्या

द्रव्यत्वसिद्धिरिति भावः अत्र नीलस्य हेतुत्वे नीलद्रव्याणामेव दृष्टांतत्वसंभवः क्रियाया हेतुत्वे मूर्तमात्रस्य
दृष्टांतत्वसंभव इति दृष्टांतसौलभ्याय द्वितीयहेत्वनुसरणमिति ध्येयं एतावता तस्य द्रव्यत्वं प्रसाध्य इ
दानीं पृथिव्यादिमनोन्तान्यतमत्वानाश्रयत्वं साधयति नत्रेति पृथिव्यादिमनोंतान्यतमस्मिन्निरित्यर्थः प
टकत्वस्यत्यर्थः तस्याकाशादिपंचकेन्वयः तमस इति तमोनिष्ठ इत्यर्थः नाकाशादिपंचकं तर्भाव इति
आकाशादिमनोन्तान्यतमत्वाभाव इत्यर्थः नम आकाशादिमनोंतान्यतमत्वशून्यमिति आकाशत्वा
दिमनस्त्वांतान्यतमशून्यमिति यावत् रूपवत्वादिति घटवदिति शेषः अत्र तमसि आकाशादिमनो
तान्यतमत्वशून्यत्वसाधनं सुलभमेकेन हेतुना संभवतीति सौलभ्यज्ञानात् प्रथमतस्तत्साधन
एववालानामिच्छासंभवतीति तदिच्छानुरोधात्पृथिव्यादिदिष्टानामथ्याकाशादिमनोंतानामन्यतम
त्वशून्यत्वमाद्रौ साधितमिति हृदयं एतेनोरीश्यकमानुसरणपृथिव्याद्यनन्तर्भूतत्वसाधनानंतरमेवा

श ४

वात् तमस्त्वस्य न द्रव्यविभाजकधर्मत्वमित्याशंकां तमसो द्रव्यत्वे पृथिव्यादिमनोन्तान्यतमत्वा
श्रयत्वेन पृथिवीत्वादिमनस्त्वान्तान्यतमरूपद्रव्यविभाजकधर्माश्रयत्वात् तमस्त्वस्य त्वे न द्रव्यवि
भाजकधर्म अधिकरणत्वाभावेन घटत्वादेरिव न द्रव्यविभाजकधर्मत्वमित्याशंकां च तमसो द्रव्य
न त्वसाधने पृथिव्यादिमनोन्तान्यतमत्वशून्यत्वसाधनेन च परिहरति तथा हीत्यादिना तमसि द्रव्यमा
ण द्रव्यत्वसाधनहेतोः स्वरूपासिद्धत्वपरिहारायादीतादृशहेतोः प्रत्यक्षसिद्धत्वमाह नीलं तम इत्यादि
ना तादृशप्रतीतेर्भ्रमत्वे विषयासिद्धेरसंभवात् अबाधितप्रतीतिवत्त्वादित्युक्तं प्रमात्मकप्रतीत्यय
थानुपपन्नेरित्यर्थः नीलरूपाधारतयेत्यादिना तादृशप्रतीत्यन्यथानुपपत्त्याः व प्रथमं मीकार्येण नीलरूप
वत्त्वलिंगेन क्रियावत्त्वलिंगेन चेत्यर्थः द्रव्यत्वं तावत्सिद्धमिति तावदिति वाक्यालंकारः द्रव्यत्वमनुमि
तिनिरूपितविधेयतावदित्यर्थः तथा च तमो द्रव्यं नीलवत्त्वात् क्रियावत्त्वाच्च नीलघटवदित्यनुमानात्

एवेति वाच्यं स्पर्शाधिकरणवृत्त्याकाशावृत्तिजातिशून्यत्वस्य समवायेन स्पर्शसंबंधित्वसमवाय
घटितसामानाधिकरण्यसंबंधेन स्पर्शसंबंधित्वान्यतरशून्यत्वस्य वा विवक्षितत्वान्न दोषः एव
मुत्तरत्राप्यूह्यं यद्यपि विरुद्धहेतुना पृथिव्यादिवायव्यान्यतमत्वशून्यत्वसाधनमुचितं सोलभ्यात् त
थापि दृष्टांतसौलभ्यहेत्वंतरसत्त्वात्तेन हेतुनापि विरुद्धान्यतमत्वशून्यत्वसाधनसंभवात्तेन हेतु
नापि वायव्यानंतर्भावसाधनापत्त्या दृशान्यतमत्वसाधनमुपेक्ष्य वायव्यानंतर्भावसाधनमादृतं तदेव
त्वादित्यस्य हेतुत्वेपि आदि पृथिव्यादित्रयाणामेव दृष्टांतता स्पर्शाभावादित्यस्य हेतुत्वे आकाशादिपं
चानामेव दृष्टांतता सदागतिमत्त्वाभावस्य हेतुत्वे तु वायुभिन्नाष्टद्रव्याणामपि दृष्टांतता संभवतीति
अनेकदृष्टांतलाभाय एतादृशहेत्वनुसरणं अत्राप्युक्तदोषवारणाय सदागतिमत्त्वाभावादित्यस्य
सदागतिमत्त्वसमानाधिकरणपृथिव्यवृत्तिजातिशून्यत्वस्य विवक्षितत्वान्न कोपि दोष इति

काशादावनन्तर्भूतत्वस्य साधनीयतया प्रथमं तत्साधने बीजाभाव इति दूषणं मयास्तं इदानीमव्यवहित
पूर्वोपस्थितक्रमेण वायावनन्तर्भूतत्वं साधयति अत एवेति रूपवत्वादेवेत्यर्थः न वायाविति वाया
वपि नान्तर्भवतीत्यर्थः यद्यपि रूपवत्वहेतुनाएकदेवबाय्वादिषु ह्यनन्तर्भावसाधनसंभवे प भाव ४
थकृतमपक्षीकृत्य तेन हेतुना वाय्वनन्तर्भूतत्वसाधनमनुचितं प्रयासाधिक्यात्तथापि वाय्वनन्त
साधकदृष्टान्तसौलभ्यसंपादकहेतुत्वं तरसत्वात्तेन हेतुनापि वाय्वनन्तर्भावसाधनाय पूर्वं वाय्वादि
षु ह्यनन्तर्भावसाधनमुपेक्ष्याकाशादिपंचकानन्तर्भावसाधनमेव कृतमिति ध्येयं स्पर्शाभावादिति
अत्र तमः वायुभिन्नं वायुत्वशून्यं वा स्पर्शाभावादित्यनुमानं फलितं अत्र वायावपि आद्यक्षणावच्छे
देन निरुक्तहेतोः सत्वाद्व्यभिचार इति नाशंकनीयं स्पर्शाभावेति स्पर्शः अभावो यस्येति व्युत्पत्त्या स्पर्श
वद्भिन्नत्वार्थकत्वेन तस्य वायावभावान्न व्यभिचारः न चैवमुत्पन्नविनष्टवायौ व्यभिचारस्तदवस्थ

33

न॰प्र॰ १७

रूपत्वमेव तथेति वोध्यं ननु तेजःसमवेतत्वविशिष्टरूपत्वं च समवायसंबंधावच्छिन्नाधेयत्वसमवाये
नउभयघटितसामानाधिकरण्यसंबंधेन तेजोविशिष्टरूपत्वरूपं समवायघटितसामानाधिकर
ण्यसमवायएतदुभयघटितसामानाधिकरण्यसंबंधेन तेजस्त्वविशिष्टरूपत्वमिति पर्यवसितं ए
वं च विशेष्यवति विशिष्टाभावस्य विशेषणाभावात्मकत्वेन रूपविशिष्टतमसि वर्तमानस्य तादृश
विशिष्टाभावस्य तेजस्त्वरूपविशेषणाभावात्मकतया तेजोभिन्नत्वसिद्धेः पूर्वं सिद्धत्वेन तेन हेतु
ना तेजोभिन्नत्वसाधनं न संभवतीत्याशयेन हेत्वन्तरमाह उद्भूतस्पर्शाभावाच्चेति अत्र उद्भूतत्वं तेज
स्समवेतस्पर्शमात्रवृत्तिस्पर्शत्वव्याप्यजातिविशेषः प्रत्यक्षसिद्धः एतन्मात्राभावे च स्पर्शपदस्या
त्रं न तु स्पर्शत्वस्यापि प्रतियोगितावच्छेदककोटिप्रवेशः प्रयोजनाभावात् उद्भूतत्वविशिष्टस्प
र्शत्वस्य उद्भूतत्वरूपतत्तद्धर्मसमनियतत्वाच्च एवं चोक्ताभावादिति हेतुः फलितः अत्राद्यपक्षेणाव

च

म

म॰

१७

ध्येयं नापि तेजसीति तेजस्यपि नांतर्भूतमित्यर्थः अपि नावाप्यवनंतर्भूतत्वं समुच्चीयते तथाच
तमो यथा वाय्ववनंतर्भूतं तथा तेजस्यपि नांतर्भूतमिति फलितं तेजोऽनंतर्भूतत्वं तेजोभिन्नत्वं
तेजस्त्वशून्यत्वं वेति बोध्यं एवं च तमस्तेजोभिन्नं भास्वररूपाभावात् घटवदित्यनुमानं बोध्यं
त्व अत्र भास्वरत्वं तेजोरूपमात्रवृत्तिशुक्लव्याप्यजातिविशेषः एतस्याभाव एव हेतुपदे रूपपदमपा
र्थं न तु प्रतियोगितावच्छेदककोटौ रूपत्वस्यापि प्रवेशः प्रयोजनाभावात् भास्वरत्वविशिष्टरू
स्य पत्वं भास्वरत्वरूपत्वगुरुधर्मस्य मनियतत्वाच्च एवं च भास्वरत्वावच्छिन्नाभावो हेतुः फलितः इदं च
सांकर्यस्य जातिबाधकत्वानंगीकर्तृनवीनमते तदंगीकर्तृप्राचीनमते तु उद्भूतत्वजात्याव्याप्यत्वानुद्भू
तत्वजात्यावासांकर्यात् भास्वरत्वं न जातिः उद्भूतत्वशून्ये चक्षुरादिरूपे भास्वसत्वात् [illegible] भा रत्वं
स्वरत्वशून्यघटादिरूपे उद्भूतत्वसत्वाच्च भारूपे चोभयसत्वाच्च किंतु तेजःसमवेतत्वविशिष्ट

न.प्र.
१८

ङ्गिमत्त्वादित्यर्थः तेनाघ्राणावच्छेदेन घटेन व्यभिचारः नचैवमप्युत्पन्नविनष्टघटे प्राचीनमते सुर
भ्यसुरभ्यवयवारब्धे घटे व्यभिचारस्तदवस्थ इति वाच्यं गंधसमानाधिकरणजलावृत्तिजातिम
त्त्वस्य विवक्षितत्वात् एतावता प्रत्येकहेतुना पृथिव्यादिचतुर्णां प्रत्येकानन्तर्भूतत्वं तमसि प्र
साध्य साधनेऽसत्त्वाप्येकहेतुना आकाशादिपंचकानंतर्भूतत्वसाधनवत् एकहेतुनापि पृ
थिव्यादिचतुष्टयानंतर्भूतत्वं साधयति स्पर्शरहितत्वाच्चेति एतस्य पूर्वेणान्वयः केचित्तु निरुक्ता
र्थकस्पर्शाभाववल्लिंगेन पृथिव्यादिचतुष्टयान्यतमभिन्नत्वसाधनं विभुत्वाभाववल्लिंगेनाकाशादिच
तुष्टयान्यतमभिन्नत्वसाधनं महत्ववल्लिंगेन मनोऽन्यत्वादिसाधनं च तदनुमितमित्याहुः विश्वनाथपं
चाननास्तु निरुक्तार्थकगंधाभाववल्लिंगेन पृथिवीभिन्नत्वसिद्धिः नीलरूपवत्त्वलिंगेन जलापृथिव्यन्य
तमभिन्नत्वसि [illegible] द्धिरिति मीमांसकाभिप्रायं वर्णयंति इदानीं मीमांसकमतमुपसंहरति तस्मादिति

च्छेदेन तेजस्युष्णाभावसत्त्वाद्व्यभिचार इति नाशंकनीयं उष्णाभावो यस्येति बहुव्रीह्या न तत्पदेनोष्णवद्भिन्न

वा. त्वार्थलाभात् नचैवं उत्पन्नविनष्टे तेजसि व्यभिचारस्तदवस्थ इति वाच्यं उष्णसमानाधिकरणपृथिवी

वृत्तिजातिशून्यत्वस्य विवक्षितत्वात् नदोष इति नापि जलत्व इति नमो जलभिन्नमित्यर्थः शीतस्पर्शाभा

वादित्युष्णस्पर्शाभावादित्युक्ते हेतुपरिष्काररीत्यान्वये हेतुः परिष्करणीयः अन्यथोक्तरीत्या दोषापत्तेः

ननु शीतवद्वृत्तिपृथिवीत्ववृत्तिजातित्वावच्छिन्नरूपगुरुधर्मावच्छिन्नस्य हेतुत्वापेक्षया लघुधर्मावच्छि

न्नस्यापि हेतुत्वं संभवतीत्याशयेनाह नीलरूपाश्रयत्वादित्यादि नीलत्वरूपजात्यवच्छिन्नवत्त्वादि

त्यर्थः अत्र दृष्टान्तो जलम्यापक्षीतस्पर्शाभावादित्युक्ता लघुधर्मावच्छिन्नहेतुसत्त्वप्रदर्शनाय नीलरू

पाश्रयत्वादित्युक्तमिति अस्मद्गुरुचरणाः नापि पृथिव्यामिति तमइति पदमनुवर्तनेन तथा च तमः

पृथिव्यां नान्तर्भवतीत्यर्थः तमः पृथिवीभिन्नमिति यावत् तत्र हेतुमाह गन्धाभावादिति गंधव

न·प्र·
१९-

त्तितार्थः हेतुघटकविशेषणाप्रयोजनं स्फुटमिति ग्रंथविस्तरभियानोक्तं ॥ अत्र चक्षुर्जन्यत्वं चक्षुःक
रणकत्वं वाच्यं यथाश्रुते घटादेरपि कालोपाधिविधया तादृशचक्षुर्ग्राह्यत्वात् तादृशचक्षुःक
रणकज्ञानविषयत्वस्यालौकिकस्यालोकेपि सत्वाद्व्यभिचारवारणाय लौकिकविषयतावत्वं
निवेशितं वस्तुतः आलोकासहकृतचक्षुर्ग्राह्यत्वं आलोकाप्रयोज्यचाक्षुषनिरूपितलौकिक
विषयत्वमेव तत्ताप्यवाच्यमिति प्रतिभाति ननु प्रभायामपि तादृशहेतुसत्वाद्व्यभिचारः तच्चाक्षु
षसंयोगेनालोकस्याहेतुत्वादिति चेन्न तच्चाक्षुषे संयोगेनालोकस्याहेतुत्वेपि तादात्म्यसंबंधेनालो
कस्य हेतुतया आलोकाजन्यत्वघटितप्राथमिकहेत्वभावात् आलोकाप्रयोज्यत्वघटितनिर्गलि
तकृत्स्नायहेत्वभावाच्च न व्यभिचार इति निरुक्तहेतावप्रयोजकशंकानिवर्तकानुकूलतर्कमाहस्व
पीत्यादिना चाक्षुषसंप्रमात्वमेवेति स्फुटीकरणं पंचात्मकप्रमायामित्युक्तं ॥ ननु तदपि कार्यताव
क

37

उद्भूतरूपस्य तमसि पृथिव्यादिमनोऽन्यान्यतमभिन्नत्वसिद्धेरित्यर्थः दशमं द्रव्यमिति पृथिव्यादिमनोऽन्यान्यत
मभिन्नत्वे सति द्रव्यत्वादिति हेतुः पूरणीयः पक्षे वँच पृथिवीतिव्यतिरेकदृष्टांतेन न तमसि निरुक्तसा
ध्यसिद्धिर्निर्बाधत्वहेतिमीमांसकाभिप्रायः तेजोभावरूपत्वादिति महाप्रभा[?]त्वावच्छिन्नप्रतियोगि
ताकात्यंताभावाभिन्नत्वादित्यर्थः ननु रूपवतः कथमभावरूपत्वमित्याशंकां रूपवद्भिन्नत्वसा
धनेन द्रव्यसामान्यभिन्नत्वसाधनेन च परिहरति तथाहीत्यादि तमो न रूपवद्द्रव्यमिति तमो रूपवद्भि
न्नं द्रव्यसामान्यभिन्नं चेति विकल्पेन साध्यद्वये तात्पर्यं तत्र रूपिभिन्नत्वसाधनत्वपक्षे उद्भूतरूपवत्त्व
प्रकारणाभावेन तत्र द्रव्यत्वप्रकारकचाक्षुषात्तस्मात् तदभावरूपयोग्यानुपलब्ध्या द्रव्यत्वाभाव
सिद्धिर्द्रव्यभिन्नत्वसाधने तु साध्याद्देवतन्नसिद्धिरिति बोध्यं आलोकसहकृतेति आलोकासहकृत
चक्षुः न ग्राह्यत्वादित्यर्थः आलोकाजन्यचक्षुर्जन्यज्ञाननिरूपितलौकिकविषयत्वात् इतिप्र

घोविशेष्यत्वंतस्य प्रतीतिद्वयेप्यन्वयः एवंच नभो विशेष्यकोनीलत्वं इति प्रत्ययस्य त्वनीति प्रत्ययस्ये
तिफलितार्थः भ्रमइति भ्रमएवेत्यर्थः तथा च नभोविशेष्यककिंचित्पदार्थप्रकारकचाक्षुषाभा
वरूपोपाधिवशाज्ज्ञायमानत्वात् नीलंनभ इति प्रतीतेर्भ्रमत्ववत् नभोविशेष्यककिंचित्प
दार्थप्रकारकचाक्षुषाभावरूपोपाधिवशात् ज्ञायमानत्वान्नीलंनभ इति प्रतीतेरपिभ्रमत्वमा त्वम
हतं एवंलोहितस्फटिक इति प्रतीतेः स्फटिके जपाकुसुमरूपोपाधिवशाज्ज्ञायमानत्वाज्जपा
कुसुमसमवेतलोहितावगाहित्वेन यथाभ्रमत्वं तथा चलतितम इति प्रतीतेरपि तेजोभाव
रूपतमसि स्वप्रतियोगिकत्वसंबंधेन तेजस्स्वरूपोपाधिसंबंधवशात् आलोकादिरूपतेजः
समवेतक्रियाविषयकत्वेन भ्रमत्वमव्याहतमितिभावः ननु द्रव्यसामान्यस्य लक्षणमनुक्त्वा
विभागकरणमनुचितं लक्षणात्मकसाधारणधर्मज्ञानाभावे विशेषधर्मप्रकारकजिज्ञासानुदये

श्रार्थसामाजप्रसक्तत्वं च त्वास्त्रयप्रवीनकताम
श्रीप्रबो न्य धर्मघटितत्वम् त्वपदेन हृ विचारव
प्रमा त्वम् २१

च्छेदकप्रविष्टं। तस्यार्थसामाजप्रसक्तत्वेन कार्यतानवच्छेदकत्वात् गौरवान्वयोजनाभावाच्च एवं चस्व
वर्णाभिन्नत्वे जोभिन्नद्रव्यवृत्तिलौकिकविषयतासंबंधेन चाक्षुषं प्रति समवायेनउद्भूतरूपस्य संयो
गेनालोकस्य हेतुत्वादित्यर्थः फलितः तथा च तादृशकार्यकारणभंगप्रसंगरूपानुकूलतर्कबला
त् व्यभिचारशंकानुत्पत्त्या व्याप्तिनिश्चयसंभवात् तमसि रूपिभिन्नत्वसिद्धिः द्रव्यभिन्नत्वसिद्धिर्निराबा
ये वेति भावः ननु तर्हि तमसः कुतो नाभावत्वमाशंकामुपसंहारव्याजेनाभावेन्नभावमपरिहरति तस्मा
द्रव्यरूपत्वाभावात् नत्समवेतत्वाभावात् संबंधरूपत्वाभावाच्चेत्यर्थः प्रौढप्रकाशिकेति महा
प्रभात्वावच्छिन्नप्रतियोगिताकाभावरूपं तमइत्यर्थः तथा च तमो निरुक्ततेजोभावरूपं भावभि
न्नत्वात् घटाद्यभाववत् इत्यनुमानान्नाहृशान्ते जत्त्वावच्छिन्नप्रतियोगिताकाभावरूपत्वं सिध्य
तीति भावः नन्वेवं सति नीलं तमश्चलतीति प्रतीतेः का गतिरित्यत आह नवेतितमसीत्यर्थः सप्तम

५०

न॰प्र॰
२१

द्रव्यत्वसमानाधिकरणेतरभेद इति ज्ञानात्मकत्वेन तादृशज्ञानस्याभिमतसाध्यसिद्धिरूपत्वेना
नंतरमनुमितिसंभवात् न तस्य आवर्तकत्वरूपलक्षणत्वमित्यत आह गुणवत्त्वं वेति अत्र निर्गति
त प्राचीनमतेऽन्वयसहचारज्ञानस्यैवान्वयव्याप्तिग्राहकतया द्रव्यमितरभिन्नं द्रव्यत्वादित्यत्र द्रव्य
मात्रस्य पक्षत्वेन दृष्टान्ताभावात् अन्वयसहचारज्ञानासंभवेनान्वयव्याप्तिर्न संभवति किन्तु गुण
दौ व्यतिरेकसहचारज्ञानात् इतरत्वात्मकद्रव्यभिन्नत्वव्यापकाभावप्रतियोगि द्रव्यत्वमिति व्यति
रेकव्याप्तिज्ञानमेव जायते इति तादृशज्ञानस्य साध्ये उक्तरीत्या हेतुरूपपक्षतावच्छेदकसामा
नाधिकरण्यानवगाहित्वेनोद्देश्यानुमितिसमानाकारज्ञानस्यानिष्पन्नत्वेन सिद्धसाधनदोषाप्र
सक्त्या तादृशानुमित्युत्पत्तौ बाधकाभावात् पक्षतावच्छेदकहेत्वोरैक्येऽपि हेतोर्न व्यावर्तकत्वरूपल
क्षणानुपपत्तिः नवीनैः पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यप्रकारकानुमितेरेवांगीकृतत्वात्

त्य
त्वा

२१

४१

नाजिज्ञासितार्थाभिधानप्रयुक्तार्थान्तरदोषापत्तेरित्याशंकां लक्षणप्रदर्शनेन स्वयं परिहरति द्र
व्यत्वजातिमत्वं वेति अत्र द्रव्यत्वं जातिरूपमिति स्फुटप्रतिपत्त्यर्थं जातिग्रहणं न च तेन रूपेण
पितस्य लक्षणत्वप्रयोजनाभावात् प्रमेयधूमत्वादिवत् द्रव्यत्वाभिन्नजातित्वस्य स्वसमानाधि
करणव्याप्यतावच्छेदकद्रव्यत्वत्वघटितत्वेन न स्वव्याप्यतानवच्छेदकतया इतरभेदानुमापक
त्वावच्छेदकतानुपपत्तेस्तन्न चेष्टापत्तिः द्रव्यत्वस्य तेन रूपेण लक्षणत्वानुपपत्तेः व्यावर्तकत्वस्यै
व लक्षणत्वपदार्थत्वात् इति हृदयं ननु द्रव्यत्वत्वेन न तस्य व्यावर्तकत्वं तथाहि द्रव्यत्वलिंगक
द्रव्यमितरभिन्नमित्यनुमितौ द्रव्यत्व[illegible]मितौ द्रव्यत्वमितरभेदसमानाधिकरणमिति व्याप्तिज्ञानं कार
णं वाच्यं हेतुः साध्यसमानाधिकरण इति ज्ञानस्यैव व्याप्तिज्ञानत्वात् एवं च पक्षतावच्छेदकसामाना
धिकरण्येन साध्यसिद्धेरुद्देश्यत्वमिति प्राचीनैकदेशिमते तादृशव्याप्तिज्ञानस्य तु स्वविशिष्टविषयतया

न·प्र·
२२

यतेन दाघटः सत्तावान् जातिमत्वादित्यादौ जातिः सत्तासमानाधिकरणेति व्याप्तिज्ञानस्य तुल्यवित्ति
वेद्यतया सत्तारूप[illegible]साध्ये जातिसामानाधिकरण्यावगाहित्वेन तादृशज्ञानस्य साध्ये जातित्वेन घट
त्वपक्षतावच्छेदकसामानाधिकरण्यावगाहित्वावश्यकतयो क्रोडीत्योरुभयसमानाकारज्ञानस
निष्पन्नत्वेन तत्राप्यनुमित्युदयप्रसंगात् न चेष्टापत्तिः अनुभवविरोधात् तस्माद्द्रव्यमितरभि
भि न्नम् द्रव्यत्वादित्यादौ सर्वमतेपि सिद्धसाधनदोषाप्रसक्त्या न उद्भावनं निपुणतरविवेचनाभावप्रयुक्त
मिति प्रतिभाति इदानीं प्रसंगसंगत्या लक्षणस्य लक्षणं वक्तुं लक्षणं [illegible] हेयाविभाज्य दर्श
यति लक्षणस्येति अत्र लक्षणशब्देन वस्तुमात्रं गृह्यते तद्द्विविधं असत् सच्चेति अत्रादावसल्ल ताल्ल
क्षणमाह त्रीणि दूषणानीति त्रयो दोषा इत्यर्थः अत्रेति शब्दार्थयोर्भेदस्तस्य दोषत्रये त्रयः तथा चाव्याप्ति
तिव्याप्त्यसंभवाभिन्नदोषत्रयान्यतमवत्वं असल्लक्षणस्य लक्षणमिति फलितं तन्नाव्याप्त्यादिस्वरूपं

43

उक्तरीत्या इतरभेदः द्रव्यत्वसमानाधिकरण इति ज्ञानस्य निष्पन्नत्वेऽपि उद्देश्यानुमिति समानाकार
क द्रव्यमितरभिन्नमिति ज्ञानस्यानिष्पन्नासिद्धसाधनदोषाप्रसक्तेः पक्षतावच्छेदकहेत्वोरैक्येऽपि न
वीनमते न सिद्धसाधनरूपदोषप्रसक्तिः वस्तुतस्तु प्राचीनैकदेशिमतेऽपि द्रव्यमितरभिन्नं द्रव्य
त्वादित्यादौ जायमानस्य द्रव्यत्वमितरभेदसमानाधिकरणमिति व्याप्तिज्ञानस्य तुल्यवित्तिवेद्य
तया इतरभेदरूपसाध्ये द्रव्यत्वत्वावच्छिन्नसामानाधिकरण्यज्ञानान्तर्भावेऽपि इतरभेदे स्वरूपतो द्र
व्य त्वसामानाधिकरण्यज्ञानस्यैवोद्देश्यतया दृशज्ञानस्यानिष्पन्नत्वेन सिद्धसाधनरूपदोषाप्रसक्त्या पक्ष
तावच्छेदकहेत्वोरैक्येऽपि द्रव्यत्वस्य न व्यावर्तकत्वरूपलक्षणत्वानुपपत्तिः यदि च स्वरूपतः पक्ष
तावच्छेदकस्य लेसाध्ये किंचिद्रूपेण पक्षतावच्छेदसामानाधिकरण्यज्ञानस्यापि उद्देश्यत्वमंगीकृ
त्य सिद्धसाधनरूपदोषेण साध्ये स्वरूपतः पक्षतावच्छेदकसामानाधिकरण्यावगाह्यनुमिति नांगीक्रि

ता

न.प्र.
२३

व

व्याप्तिरिति अतिव्याप्तिस्वरूपमित्यर्थः अत्राव्याप्तिरूपदोषलक्ष्यकपिलत्वजातावतिवारणाय वि
शेष्यभागः असंभवदोषलक्ष्म एकशफत्वादावतिव्याप्तिवारणाय सत्यंतमिति बोध्यं तदुदाह
रति यथेति गोः शृंगित्वमिति गोलक्षीकृत्येतरभेदानुमापकत्वेन तात्पर्यविषयः शृंगवत्त्वमित्य
र्थः लक्ष्यमात्रावर्तनमिति लक्ष्यतावच्छेदकासमानाधिकरणभेदप्रतियोगितानवच्छेदका
भावप्रतियोगित्वमित्यर्थः असंभवइति असंभवस्वरूपमित्यर्थः असंभवरूपदोषस्य ल
क्ष्यमुदाहरति यथेति गोरेकशफवत्त्वमिति गोलक्ष्यीकृत्येतरभेदानुमापकत्वेन तात्पर्यवि
षयैकशफत्वावच्छिन्नवत्त्वमित्यर्थः अत्रातिव्याप्तिरूपदोषस्य व्यापकसामानाधिकरण्यव्याप्ति
घटकव्यापकत्वांशग्रहविरोधितया असंभवरूपदोषस्येतरभेदरूपसाध्यसमानाधिकरण
व्यावर्तकधर्मरूपस्य तादृशव्याप्तिघटकसाध्यसामानाधिकरण्यांशग्रहविरोधितया चोभयो

२

45

क्रमेणाहत्त्वस्यैकदेशावृत्तित्वमिति लक्ष्यतावच्छेदकसमानाधिकरणभेदप्रतियोगितावच्छे
दकत्वे सति लक्ष्यतावच्छेदकसमानाधिकरणभिन्नत्वमित्यर्थः अव्याप्तिरिति अव्याप्तिस्वरूपमित्यर्थः अ
न्नासंभवरूपदोषलक्ष्ये एकदेशसत्त्वादिति व्याप्तिवारणाय विशेष्यदलं ~~अतिव्याप्तिरूपदोषलक्ष्ये~~
~~एकदेशसत्त्वादिति व्याप्तिवारणाय विशेष्यदलं~~ अतिव्याप्तिरूपदोषलक्ष्ये गत्वादावतिव्याप्तिवारणाय
सत्यंतमिति बोध्यं अव्याप्तिरूप-दोषस्य लक्ष्यं दर्शयति यथेति गोः कपिलत्वमिति गां लक्षीकृत्य इतरभेदा
नुमापकत्वेनांगीकृतं गोत्वव्याप्य कपिलत्वजातिमत्त्वमित्यर्थः अत्र कपिलत्वविशेष्यकनिरुक्ताव्या
प्तिप्रकारकज्ञानस्य लक्ष्यतावच्छेदकगोत्वावच्छेदेन पक्षधर्मताज्ञानविघटकतयाऽव्याप्तिरूप
दोषस्य दूषकत्वमिति बोध्यं लक्ष्यवृत्तित्वे सति अलक्ष्यवृत्तित्वमिति लक्ष्यतावच्छेदकसमानाधि
करणत्वे सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसमानाधिकरणत्वमित्यर्थः अति

यते तथा दोषत्रयरहितत्वासाधारणत्वयोः समनियतत्वात्तस्यैव तादृशशब्देनापि व्यवहारः संभवतीति
फलितोऽर्थः तथा च लक्षणस्य लक्षणान्तराद्दूषकतया दोषत्रयरहितत्वासाधारणत्वयोरुभयोरपि
सल्लक्षणीयव्यवहारिकलक्षणत्वे बाधकाभाव इति भावः अत्र सल्लक्षणलक्षणे धर्मत्वनिवेशे
प्रयोजनाभावात् असाधारणत्वमेव लक्षणं वाच्यं न द्वयमपि न संभवति न साधारणमसाधारणं तस्य
भाव इत्युत्पत्त्या तस्य केवलान्वयिभिन्नधर्मत्वरूपत्वेन कपित्वादिरूपासल्लक्षणसाधारणत्वा
दित आह लक्ष्यतावच्छेदकसमनियतत्वमिति असाधारणत्वमिति असाधारणत्वशब्दार्थ इत्यर्थः
तथा चासाधारणत्वपदं न यौगिकं किं तु पारिभाषिकमिति भावः अत्र लक्ष्यतावच्छेदकसमनियत
त्वं लक्ष्यतावच्छेदकव्याप्यत्वे सति लक्ष्यतावच्छेदकव्यापकत्वं लक्ष्यतावच्छेदकव्याप्यत्वं च न लक्ष्य
तावच्छेदकवह्निन्याहृत्तित्वं वाच्यत्वादिरूपकेवलान्वयिनि निरुक्तव्याप्यत्वाभावेन न तद्वारितसमनि

दूषकत्वं वोध्यं अस्मद्गुरुचरणास्तु असंभवस्य पक्षधर्मतावच्छेदकग्रहविरोधितया दूषकत्व
माहुः असल्लक्षणस्य लक्षणमुक्त्वा सल्लक्षणस्य लक्षणमाह एतदिति शर्वोक्तेत्यर्थः दूषणत्रयरहि
त इति दोषत्रयान्यतमशून्य इत्यर्थः धर्म इति वस्तुत्वावच्छिन्न इत्यर्थः धर्मत्वनिवेशे प्रयोजनविरहा
त् लक्षणमिति सल्लक्षणशब्दप्रतिपाद्यमित्यर्थः तथा च तादृशत्रयान्यतमशून्यत्वं सल्लक्षणसलक्षण
मिति भावः ननु असाधारणधर्मो लक्षणं सत्यकीर्त्तिनमिति टीकाकारवचनेनासाधारणधर्मत्वस्यैव स
ल्लक्षणत्वप्रतिपादनात् तदुपेक्ष्य दोषत्रयरहितत्वस्य सल्लक्षणलक्ष्यत्वे वो लाभाव इत्यत आह
स एवेति निरुक्तदोषत्रयरहित एवेत्यर्थः असाधारणधर्म इत्युच्यत इति असाधारण [illegible] धर्मशब्दे
नापितानां त्रिकेऽव्यवहीयन इत्यर्थः एवकारेण दोषत्रयरहितान्यधर्मस्यासाधारणशब्दप्रतिपाद्य
त्वमवच्छेदलाभः एवं च द्रव्यत्वगुणित्वयोः समनियतत्वात् यथा द्रव्यमेव गुणिशब्देन व्यवह्रि

कि
लक्षण

48

ते

त्व

भिन्नाहारात् वैकल्पिकार्थो लभ्यते तत्र व्यावृत्तिमात्रस्य लक्षणप्रयोजनत्वपक्षे गौरवं दर्शयितुमाहो
व्यावृत्तिप्रयोजनकधर्ममात्रं पक्षीकृत्य लक्षणमुपपादयति व्यावर्तकस्यैवेति लक्षणत्व इति लक्षण
त्वेन प्रामाणिकव्यवहारविषयत्व इत्यर्थः तथा च प्रामाणिकानां लक्षणत्वेन व्यवहारविषया ये तेषामेवे
दृशलक्षणलक्ष्यत्वं वाच्यं प्रकृते व्यावर्तकधर्माणामेव लक्षणत्वेन प्रामाणिकव्यवहारविषयत्वेन व्या
वृत्तिव्यावर्तकत्वमेव लक्ष्यतावच्छेदकं स्वीकार्यमिति व्यावर्तकत्वावच्छिन्नस्यासाधारणत्वं लक्षण
मिति फलितमिति भावः अस्मिन्पक्षे दोषमुद्भाव्य परिहरति व्यावृत्ताविति पृथिवीनिष्ठजलादिभेदरू
पव्यावृत्तावित्यर्थः तथा च पृथिवीनिष्ठजलादिप्रतियोगिकभेदस्य न व्यावर्तकत्वं साध्यहेत्वोरैक्ये
न हेतुमान्पक्ष इत्याकारकपक्षधर्मताज्ञानस्यैव साध्यनिर्णयात्मकत्वेन प्रतिबन्धकसत्त्वात् तदुत्त
रमतौ स्वस्याव्यावृत्तेर्व्यावर्तकत्वासंभवेन व्यावृत्तेर्लक्ष्यतावच्छेदकस्य न्यूनतया तादृशव्यावृत्तौ लक्षणा

शि उत्त

यतत्वाभावात् अथैतज्जातिव्याप्त्यभिधानस्यासांगत्यापत्तेः किंतु स्वव्यापकलक्ष्यतावच्छेदकत्वमेव
तद्व्याप्यत्वं अत्र व्याप्यदले व्यापकदले च संबंधविशेषधर्मविशेषनिवेशनं तत्प्रयोजनं च स्वधीभि
रूह्यं अतो नोक्तदोष इति प्रांचः ॥ नव्यास्तु उक्तरीत्या समनियतत्वपरिष्कारे तच्छरीरे लक्ष्यतावच्छेदक
स्य द्विधा निवेशप्रसक्त्या गौरवापत्तेः स्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकसमानाधिक
रणभेदप्रतियोगितानवच्छेदकत्वरूपमेव तद्वाच्यं लक्ष्यतावच्छेदकनिष्ठव्यापकत्वशरीरे लक्ष
णनिष्ठव्यापकत्वशरीरे च संबंधविशेषधर्मविशेषनिवेशनं तत्प्रयोजनं च स्वयमूह्यं अतो न को
पि दोष इति प्राहुः ॥ ननु व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनमिति भाष्यात् सावधारणप्रथम
जव्यावृत्तिशब्देन व्यावृत्तिरेव लक्षणस्य प्रयोजनं व्यवहारो वेत्यत्र व्यवहारपदस्य व्यावृत्तिसहि
तव्यवहारत्वाल्लाक्षणिक तया व्यावृत्तिसहितव्यवहारो लक्षणस्य प्रयोजनमिति विकल्पार्थकवाशब्दसम

न.प्र.
२६

न ३

भिन्नत्वलक्ष्यतावच्छेदकसमनियतत्वे तन्निष्ठत्वावच्छिन्नमेवलक्षणं वाच्यं समुदायस्य लक्षणत्वांगीकार
प्रयुक्तगौरवं व्याहतमिति भावः आवर्तकस्यैव्यावहारिकस्यापि लक्षणत्वेन प्रामाणिकव्यवहारवि
षयत्वकल्पनेनोक्तगौरवावकाशइत्याह व्यवहारस्येपि इति अपिना व्यावृत्तेः परिग्रहः लक्षणप्रयोज
नत्व इति लक्षणात्मकलिंगज्ञानेनज्ञाप्यत्वइत्यर्थः नदेयमिति तद्भिन्नत्वविशेषणं नदेयमित्यर्थः तत्र
हेतुमाह आवृत्तेरपीति अपिनाव्यावर्तकगन्धादेः परिग्रहः व्यवहारसाधनत्वादिति व्यवहारानु
मापकत्वादित्यर्थः तथाचआवृत्तेरिवव्यवहारस्यापि लक्षणप्रयोजनत्वस्वीकारपक्षे व्यावर्तकस्ये
वव्यावहारिकस्यापि लक्षणत्वेन प्रमाणिकव्यवहारविषयत्वमवश्यं स्वीकार्यं एवंच घटः पृथि
त्वा वीति व्यवहर्तव्यो जलादिभेदवत्त्वात् पटवत् एवंच घटः पदार्थ इति व्यवहर्तव्योऽभिधेयत्वात्पटव
दित्यादि सदनुमानात् सिद्धसाधनरूपदोषाभावेन व्यवहारविधेयकानुमित्युत्पत्त्या व्यावृत्तेः केवला

वच्छेदकसमनियतत्वरूपलक्षणसत्वादतिव्याप्तिरिति भावः व्यतिरेकिण्यतिव्याप्तिमुक्त्वा केवला
न्वयिन्यव्याप्तिमाह अभिधेयत्वादौ चेति पदार्थत्वावच्छिन्नपदार्थः अभिधेयत्वादिव्यवहारानु
मापकाभिधेयत्वादौ चेत्यर्थः आदिना प्रमेयत्वादिपरिग्रहः चकारादुक्तव्यतिरेकिधर्मसमुच्चयः तथा
च पदार्थत्वादिरूपाप्रसिद्ध्या प्रमेयत्वादेस्तु आवर्तकत्वासंभवेन व्यावर्तकत्वरूपलक्षणावच्छेद
करूपतया तत्र पदार्थः त्वरूपलक्षणावच्छेदकसमनियतत्वरूपलक्षणसत्वादतिव्याप्तिः इति भावः
तद्वारणायेति उक्तस्थलेऽतिव्याप्तिवारणायेत्यर्थः तद्भिन्नत्वमिति व्यतिरेकिभिन्नत्वकेवलान्वयिभि
न्नत्वोभयवत्वमित्यर्थः धर्मे विशेषणमिति लक्षणतावच्छेदकसमनियतत्वविशेषणमित्यर्थः देयमि
ति आवश्यकमितीति आवश्यकमित्यर्थः तथा च तादृशापूर्वे निरुक्त भेदद्वयस्य विशेषणत्वे विशेषणाविशेष्य
भावे विनिगमनाविरहप्रयुक्तलक्षणद्वयापत्तिप्रयुक्तगौरवमिया व्यतिरेकिभिन्नत्वकेवलान्वयि

52

न॰प्र॰
२८

त्तिमात्रसंपादकतया न तदभिधानस्यासांगत्यापत्तेः न द्वितीयः तादृशधर्माश्रयप्रतियोगिकभेदत्वेने
न घटत्वाद्यव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदग्रहणे अभिधेयत्वादेः तादृशभेदावच्छि
न्नप्रतियोगिताकभेदव्यभिचारित्वेन तदनुमापकत्वरूपतल्लक्ष्यतावच्छेदकस्य घटादिनिष्ठतद्भि
न्नत्वादावेव सत्त्वेन तच्छून्यत्वरूपात्तल्लक्षणस्याभिधेयत्वादावसत्त्वादिति व्याप्त्यभिधानसंगमनेपि ता
दृशधर्माश्रयप्रतियोगिकभेदत्वेन घटपटोभयत्वादिरूपव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगि
ताकभेदग्रहणपक्षे तादृशभेदस्य केवलान्वयितया तदवच्छिन्नप्रतियोगिताकभेदाप्रसिद्ध्या
तदनुमापकत्वरूपतल्लक्ष्यतावच्छेदकस्य सुतरामप्रसिद्धत्वेनाभिधेयत्वादौ लक्ष्यतावच्छेदकशून्य
त्वरूपात्तल्लक्षणत्वाभावादिति व्याप्त्यभिधानासंगते ईदृशरत्नकोशकारमतं तल्लक्ष्यतावच्छेदकपदार्थत्वा
श्रयपनिष्ठप्रतियोगिताकभेदस्य घटत्वादिरूपाव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदरूपस

53

२८

न्वयिधर्मस्य च व्यवहारानुमापकत्वेन तयोरपि लक्षणत्वेन प्रामाणिकव्यवहारविषयत्वात् तत्साधारण

स्य व्यावृत्तिव्यवहारान्यतमानुमापकत्वस्यैव लक्ष्यतावच्छेदकत्वं वाच्यं १ स्यं च व्यावृत्तेः केवलान्वयि

धर्मस्य च निरुक्तलक्ष्यतावच्छेदकाक्रांततया ऽलक्ष्यत्वाभावेनातिव्याप्त्यप्रसक्तेः तद्भिन्नत्व विशे

प्रयोजनाभावात् अस्मिन् कल्पे लाघवमव्याहतमितिभावः नन्वत्र व्यावर्तकत्वमितरभेदानुमापक

त्वं केवलभेदानुमापकत्वं वा प्रथमपि लक्ष्यतावच्छेदकं तत्तद्वच्छिन्नप्रतियोगिताकभेदावच्छिन्न

प्रतियोगिताकभेदवत्वं तादृशभेदाश्रयप्रतियोगिकभेदवत्वं लक्ष्यतावच्छेदकं तत्तद्धर्माश्रयप्र

तियोगिकभेदावच्छिन्नप्रतियोगिताकभेदवत्वं तादृशभेदाश्रयप्रतियोगिताकभेदवत्वरूपं वा

न प्रथमद्वितीयपक्षौ पदार्थत्वावच्छिन्नप्रतियोगिताकभेदाप्रसिद्ध्या तद्घटितेतरभेदानुमापकत्व

रूपलक्ष्यतावच्छेदकस्यस्तुतरामप्रसिद्ध्याऽभिधेयत्वादेस्तच्छून्यत्वाभावात् तत्र लक्षणस्यत्वस्या

काशभेदरूपप्रतियोग्यवृत्तिभेदानुमापकत्वे रूपलक्षणावच्छेदकाक्रान्ततयाऽतिव्याप्त्यसंगतिर्दुर्वारे
ति वाच्यं प्रतियोग्यवृत्तिभेदमात्रवृत्तिधर्मावच्छिन्नानुमापकत्वस्यैव व्यावर्तकत्वपदार्थत्वेनाभिधे
यत्वादेस्तादृशलक्षणतावच्छेदकानाक्रान्तत्वेनोक्तदोषाभावात् नन्वेवमपि घटभेदपटभेदान्यतरत्व
स्यापि केवलान्वयिनावच्छेदकतया घटभेदस्यैव प्रतियोग्यवृत्तित्वेन च तादृशान्यतरत्वस्य प्रतियोग्यवृ
त्तिभेदमात्रवृत्तित्वात् तेन रूपेण घटभेदादिरूपप्रतियोग्यवृत्तिभेदानुमापकत्वरूपलक्षणावच्छेद
काक्रान्तत्वमभिधेयत्वादेरक्षतमिति तद्दोषतादवस्थ्यमिति वाच्यं प्रतियोग्यवृत्तिभेदमात्रवृत्तिभेदत्वा
वच्छिन्नानुमापकत्वस्यैव व्यावर्तकत्वपदार्थत्वात् प्रकृते तादृशान्यतरत्वस्य तादृशभेदत्वरूपत्वा
भावेनाभिधेयत्वादेर्निरुक्तलक्षणतावच्छेदकानाक्रान्ततया नोक्तदोषप्रसक्तिः नन्वेवमपि जलादि
प्रतियोगिकभेदरूपव्यावृत्तेरपि जलत्वावच्छिन्नप्रतियोगिताकत्वस्य निरुक्तभेदत्वात्मकत्वात् तदव

त

55

व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदरूपस्य वाग्रहणेपि तादृशभेदाश्रयनिष्ठकुत्रकुत्स्न
त्नोभयत्वावच्छिन्नप्रतियोगिताकभेदस्य केवलान्वयितयाऽभिधेयत्वादेरपि तद्व्याप्यत्वेन तदनुमा
पकत्वरूपलक्षणावच्छेदकाक्रांतत्वात् लक्षणत्वाभावेनातिव्याप्त्यभिधानासंगतिः केवलभेदानु
मापकत्वरूपावर्त्तकत्वपक्षोप्ययुक्तः अभिधेयत्वादेरपि घटपटोभयत्वादिरूपव्यासज्यवृत्तिधर्मा
वच्छिन्नप्रतियोगिताकभेदानुमापकत्वरूपलक्षणावच्छेदकत्वाश्रयत्वात् तत्रातिव्याप्त्यभिधा
नासंगतेरीश्वरत्वादिति चेदत्र प्रांचः आवर्त्तकत्वं प्रतियोग्यवृत्तिभेदानुमापकत्वं नातो व्यासज्यवृ
त्तिधर्मावच्छिन्नप्रतियोगिताकभेदानुमापकत्वमादायाभिधेयत्वादेर्लक्षणावच्छेदकाक्रान्त
त्वप्रसक्तिः न चैवमाकाशाभावाकाशभेदान्यतरत्वस्य केवलान्वयितावच्छेदकतया आकाश
भेदस्य प्रतियोग्यवृत्तिभेदस्वरूपतया चाभिधेयत्वादेस्तादृशकेवलान्वयितावच्छेदकरूपेण

न॰प्र
२९

त्वदवच्छिन्नानुमापकत्वरूपलक्षणतावच्छेदकाक्रांततया तन्नातिव्याप्त्यभिधानासंगतेर्दुर्वारत्वा
त् तथाच प्रतियोग्यवृत्तिभेदमात्रवृत्तिहेतु घटकप्रतियोगिप्रतियोगिकावृत्तिभेदत्वावच्छि
न्नानुमापकत्वमेव व्यावर्त्तकत्वमिति फलितं एवं च न कश्चिद्दोष इत्याहुः वस्तुतस्तु व्यावर्तकत्व
मत्र तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्ननिरूपितव्याप्यत्वमेव गंधादेर्जलादिनि
ष्ठतद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्ननिरूपितव्याप्तिमत्त्वाल्लक्षणत्वोपपत्तिःकृति
धेयत्वादेः किंचिद्दपि तादृशभेदत्वं न व्यापकतावच्छेदकमिति यत्किंचित्तादृशभेदत्वावच्छिन्ननि
रूपितव्याप्यत्वाभावात् अलक्षणत्वोपपत्तिः न चैवमपि जलादिभेदरूपव्यावृत्तेरपि जलादिनिष्ठ
तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्ननिरूपितव्याप्तिरूपलक्षणतावच्छेदकाक्रांततया
तन्नातिव्याप्त्यभिधानमसंगतमिति वाच्यं हेतुघटकप्रतियोग्यवृत्तित्वेन तद्व्यक्तित्वस्य विशेषणीयत्वात्

२९

58

~~साध्यहेतोरपि जलत्वावच्छिन्नप्रतियोगिताकत्वस्य निरुक्तभेदत्वात्मकत्वात् तद्दवच्छिन्नानुमापकत्वे~~
नत्तस्य तावच्छेदकाक्रांतत्वेन तत्रातिव्याप्त्यभिधानासंगतिः न चैवं सिद्धसाधनप्रसक्तिः साध्यहेतोरे
क्यादिति वाच्यं साध्यहेत्वोरैक्येपि जलादिप्रतियोगिकभेदनिष्ठसमुदायस्यैव हेतुतावच्छेदकतया ग
जलभेदत्वस्य साध्यतावच्छेदकतया च हेतुतावच्छेदकसाध्यतावच्छेदकयोर्भेदान्न सिद्धसाधन
प्रसक्तिरिति चेन्न हेतुघटकप्रतियोगिप्रतियोगिकावृत्तित्वेन तादृशभेदत्वस्य विशेषणीयत्वात् प्रकृते
जलभेदत्वस्य तादृशस्य जलादिभेदसमुदायात्मकस्य घटकजलादिभेदप्रतियोगिजलादिप्रति
योगिकभेदवृत्तित्वाद्व्यावृत्तावतिव्याप्त्यभिधानसंगतिः यत्तु हेतुघटकावृत्तित्वेनैतादृशभेद
त्वं विशेषणीयं लाघवात् व्यावृत्तावतिव्याप्त्यभिधानसंगतिश्चेति तन्न तथा सति जलनिष्ठत्वघटि
त्वावच्छिन्नप्रतियोगिताकभेदत्वस्यापि निरुक्तभेदात्मकत्वात् हेतुघटकावृत्तित्वाद्व्यावृत्ते

त्वा

वृत्ति

क

त्वविशिष्टताव्याप
कत्वविशिष्टताकत्वं
स्वघटकत्वं स्वप
देन गंधादिः अ
पवाद्त्वाविशिष्टि
ष्टी प्रतीत्यविश
पत्वं स्वघटकत्वं
स्वपदेन गंधादिः ५

तविशेषणवैयर्थ्यात्रेति दूषणमपास्तं प्राचीनस्यापि निरुक्तभेदत्वावच्छिन्ननिरूपितव्याप्यत्वरूप
व्यावर्तकत्वएवतात्पर्यात् परंतु प्राचीनमते गुरुभूतं व्यावर्तकत्वं निष्कृष्टकल्पे लघुभूतं तदिति
बोध्यमिति वैयर्थ्य दिक् गुणवत्त्वमिति गुणत्वावच्छिन्नमित्यर्थः ननु गुणाधिकरणत्वमर्थः वक्ष्यमाण
द्यक्षणावच्छिन्नघटाद्यभिधानासंगतेः न द्रव्यलक्षणमिति समवायसंबंधेन न द्रव्यभिन्नेतर
भेदानुमापकमित्यर्थः तत्र हेतुमाह आद्यक्षणइति आद्यक्षणावच्छेदेनेत्यर्थः द्रव्येऽव्याप्तेरिति यो
जनानतु गुणाधिकरणत्वस्यैव लक्षणत्वस्वीकारात् नोक्तस्य लेशव्याप्तिरित्यत आह उत्पन्नविन
ष्ट इति विनाशसामग्रीसमवहितावयवजन्यद्रव्यस्येत्यर्थः तथा च तादृशद्रव्ये गुणाधिकरणत्वस्याप्यभा
वात् अव्याप्तिरिति भावः ननूत्पन्नविनष्टद्रव्ये मानाभावः द्रव्यासमवायिकारणस्य कार्यसहभा
वेनैव हेतुतया घटाद्युत्पत्तिसमये कपालादिसंयोगसत्ताया आवश्यकत्वात् असमवायिकारणना

प्रकृते जलादिनिष्ठतद्व्यक्तित्वस्य तादृशप्रतियोगिवृत्तित्वेन घटादिनिष्ठतद्व्यक्तित्वस्यैव तादृशतया तदव
च्छिन्नप्रतियोगिताकभेदत्वावच्छिन्ननिरूपितव्याप्यत्वस्य व्याहतत्वाभावात् तत्रातिव्याप्त्यभिधानं नि
राबाधमेव वस्तुतस्तु न कोऽपि दोष इति प्रतिभाति एतेन घटभेदत्वस्य तादृशभेदत्वात् वह्निरूपहेतुघट
कप्रतियोगिप्रतियोगिकावृत्तित्वात् च व्याहतत्वाभिधेयत्वादेश्च तद्धर्मावच्छिन्ननिरूपितव्याप्यत्व
भ्रमतादृशयोस्तद्धर्मावच्छिन्नानुमापकत्वरूपव्यावर्त्तकत्वसत्त्वात्तयोरपि लक्ष्यत्वेनातिव्याप्त्यभिधा
नमसंगतम् न च व्यावर्त्तकत्वं निरुक्तभेदत्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्नकार्यता
निरूपितज्ञाननिष्ठकारणतानिरूपितविषयतासंबंधावच्छिन्नावच्छेदकताश्रयत्वमादिमत्वरूपमे
वेति व्याहृतादेस्तादृशव्यावर्त्तकत्वाभावात् तत्रातिव्याप्त्यभिधानं निराबाधमिति वाच्यं तथा सति गौ
रवापत्तेः व्यावर्त्तकस्य निरुक्तभेदत्वावच्छिन्ननिरूपितव्याप्यत्वपर्य्यवसिततया व्याप्यत्वावच्छेदकां

त्व

व्या

60

पद्यते तदा अहिंसा परमो धर्म इति तत्र व्याख्यासिद्धाहिंसारूपस्य धर्मस्य सर्वैरंगीकृतत्वेन सर्वेषामपि तन्
मतप्रवेशापत्तेः अत एव तर्कभाषाव्याख्यायां चं त्वशब्दस्य स्वोत्तरोत्पन्नविशेषगुणनाशकाभावा
त् नाशो न स्यादित्याक्षिप्यान्यत्र तस्य नाशकत्वेऽपि अन्त्यशब्दे स्वस्यैव नाशकत्वाभ्युपगमात् नचैवं
सति द्वितीयक्षणे तस्य नाशापत्तिरिति वाच्यं इष्टापत्तेरित्यन्त्यशब्दस्य क्षणिकत्वप्रतिपादकगौरीकांत
भट्टाचार्यैरपि संगच्छते तस्मात् प्राचीनैकदेशिमते उत्पन्नविनष्टघटः सप्रमाण एवेति दिक् गुण
समानाधिकरणेति इदं च गुणत्वजातिमादाय गुणादावतिव्याप्तिवारणाय अधिकरणत्वं वृत्तित्वं च स
मवायेन बोध्यं नातः कालिकादिनाधिकरणत्वं वृत्तित्वं चादाय दोषः सत्ता जातिमादाय तद्वैवातिव्याप्तिवा
रणाय जातौ सत्ताभिन्नत्वनिवेशः जातिमत्वस्य विवक्षितत्वादिति तादृशजातिमत्वस्य लक्षणत्वेन
तात्पर्यविषयत्वादित्यर्थः अत्र जातित्वेन न जातेः प्रवेशः गौरवात् प्रयोजनाभावाच्च किंतु धर्मत्वेन सम

ध

शरूपकारणाभावेन द्वितीयक्षणे द्रव्यनाशासंभवादिति चेन्न द्व्यणुकनाशं प्रत्यन्यथानुपपत्त्याः स
मवायिकारणनाशस्य हेतुत्वस्वीकारेपि प्राचीनैः समवायिकारणं विना ● क्षणद्वयं द्रव्यस्थित्यापत्ति
प्रसंगरूपदोषेणान्यत्र समवायिकारणनाशस्यैव हेतुत्वस्वीकारादिति एवंच घटाद्युत्पत्तिसमयेक
पालादिनाशे सति द्वितीयक्षणे घटादिनाशस्वीकारे बाधकाभावात् उत्पन्नविनष्टद्रव्यसिद्धिः नचैवं
सति समवायिकारणस्य कार्येसहभावेनहेतुत्वमिति नियमभंग इति वाच्यं गुणादिरूपकार्ये तथानि
यमेपि द्रव्येतादृशनियमेमानाभावात् नचैवंसति असमवेतभावकार्यानुत्पत्तिरिति भाष्यग्रंथविरो
ध इति वाच्यं अव्यवहितपूर्वक्षणे समवायिकारणसत्त्वं विना समवायसंबंधेन भावकार्याणां नोत्पत्ति
रिति तदर्थत्वान्नोक्तदोषः ननु क्षणिकपदार्थस्वीकारे बौद्धमतप्रवेशापत्तिश्चेन्न नहि वयं पदार्थसा
मान्यस्य क्षणिकत्वं ब्रूमः येन तत्र प्रवेशः स्यात् यदि तत्सिद्धान्तैकदेशग्रहणमात्रेण तन्मतप्रवेशः सं

श्रव

न.प्र.
३२

शसामानाधिकरण्येनाश्रयगतैकत्वादिविषयकत्वे एकरूपे तादृशसंवंधेनाश्रयगतवहुत्वस्या
पि सत्वादिह रूपं वहुरस्तूपि व्यवहारापत्तिः न च तादृशसामानाधिकरण्यमाश्रयमात्रवृत्तिधर्मा
णामेव संवंधपदृति स्वीक्रियते एवं च वहुत्वस्यैतद्रूपमात्रवृत्तित्वाभावात् वहुत्वस्य तादृशसामाना
धिकरण्येन संवंध इति नानीदृशव्यवहारापत्तिरिति वाच्यं तथा सति वहुत्वस्याकाशमात्रवृत्ति
त्वया वहुत्वनिरूपिततादृशसामानाधिकरण्यस्य शब्दनिष्ठस्य तत्संवंधत्वाभावात्शब्दा वहवः इति प्रा
माणिकव्यवहारानुपपत्तेर्दुर्वारत्वादिति चेन्न येन संवंधेन यस्य विशिष्टबुद्धिः प्रामाणिकी तस्यैव त
त्संवंधत्वं नान्यस्येति नियमात् प्रकृते तद्रूपं वह्विति प्रामाणिकप्रत्ययाभावेन तद्रूपे वहुत्वसामाना
धिकरण्यस्य संवंधत्वानभ्युपगमात् ननु तद्रूपं वह्विति व्यवहारापत्तिः शब्दविशेष्यक वहुत्वप्रकारक
प्रामाणिकप्रत्ययवलात्तशब्दनिष्ठस्य वहुत्वसंवंधत्वस्वीकारेण शब्दा वहव इति व्यवहारोत्पत्ति

—सामानाधिकरण्यस्य वहुत्व १

63

३२

वायेन तादृशधर्मवत्त्वं विवक्षणीयं नातः कालिकसंबंधेन तादृशधर्मवत्त्वमादायातिप्रसंगः एत
ज्ञाभायैव जातिपदमिति बोध्यं इति व्यवहारादिति इत्याकारकप्रामाणिकव्यवहारवलात्तादृशव्यव
हारे स्खलितप्रत्ययवलाच्चेत्यर्थः रूपादाविति एकत्वादिगुणसिद्धौ चेति शेषः अतिव्याप्तिरिति जा
तिघटितलक्षणस्यापत्तिव्याप्तिरित्यर्थः एकार्थसमवायेनेति समवायघटितसामानाधिकरण्येना
श्रयगतैकत्वविषयकत्वस्वीकारेणैवेत्यर्थः तादृशव्यवहारोपपन्नाविति एकमित्यादिव्यवहारस्य
तदुस्खलितप्रत्ययस्य च प्रामाण्यनिर्वाह इत्यर्थः गुणे गुणानंगीकारादिति गुणस्य समवायेन गुणवृत्ति
ग त्वानभ्युपगमादित्यर्थः तथा च तादृशव्यवहारस्य तदुस्खलितप्रत्ययस्य च तादृशसामानाधिकरण्येनैव
गुणे गुणत्वव्यवस्थापकत्वात् तत्र साक्षात्संबंधेन गुणसाधकप्रमाणान्तराभावाच्च गुणे समवायेन
गुणवत्त्वासिद्ध्या नोक्तलक्षणस्य तत्रातिव्याप्तिरिति भावः नन्वेकमित्यादिव्यवहारस्य तादृशप्रत्ययस्य च तादृ

त्वकर्मभिन्नत्वसामान्याधिकरणत्वे तन्निष्ठत्वावच्छिन्नं लक्षणमितिपर्यवसन्नं एतेनैतादृशलक्षण
घटकर्मत्वस्य विशेषणाविशेष्यभावे विनिगमनाविरहप्रयुक्तलक्षणत्रयापत्तिः तादृशधर्मद्वय
स्यन्निष्ठत्वेन लक्षणत्वे तन्निष्ठत्वावच्छिन्नस्यैकसंबंधेनावर्तमानतया लक्षणतावच्छेदकसंबंधाप्रसिद्धिरि
ति दूषणस्यानवकाशः अस्मत्गुरुचरणास्तु द्रव्यकर्मभिन्नत्वे सतीति द्रव्यकर्मासमवेतत्वविशिष्टत्व
र्थः एवं च द्रव्यासमवेतत्वकर्मासमवेतत्व एतदुभयविशिष्टसामान्यवत्वं लक्षणमिति फलितं अतो नो
क्तदोष इति व्याचक्षुः लघुलक्षणमाह गुणत्वजातिमानिति अत्र गुणत्वं जातिरेवेति स्फुटीकरणा
य जातिग्रहणं ननु गुणत्वजातित्वेनापि लक्षणत्वं लक्षणतावच्छेदककोटौ जातित्वप्रवेशे गौरवा
त् प्रयोजनाभावाच्च न च तस्य जातित्वानंगीकारेपि क्षतिविरहः रूपादिसंस्कारांतान्यतमत्वरूपगुण
त्वस्यैव लक्षणत्वसंभवादिति वाच्यं तथा सति गुणत्वं नाम सामान्यविशेष इति भाष्यविरोधापत्तिरि

अत्र तत्र स्फटिकादिभिन्ने सत्यपि लौहित्यस्य स्वाश्रयसंयोगेन संबंधः किंतु स्फटिकादावेवेति सिद्धं
न वागीशभट्टाचार्योक्तिरपि संगच्छते तेन स्यान्योक्तदोषः वस्तुतः एकार्थसमवायेनैवेति वाक्यघटकैवका
रस्यापार्थकतया अनुक्तसमुच्चायकापिशब्देन तद्व्यक्तित्वं पारिभाषिकैकत्वमेव गृह्यते एवं चापेक्षाबुद्धि
विशेषविषयत्वरूपद्वित्वादिकमादाय यथा द्वे रूपे इत्यादिव्यवहाराद्युपपत्तिः तथैव तद्व्यक्तित्वरूपता
दृशैकत्वमादायैकं रूपमिति व्यवहाराद्युपपत्तिः इति न कश्चिद्दोषः दीपिकाकारस्याप्यत्रैवानिर्भर इति
प्रतिभाति गुणं विभजते इति उद्देशक्रमानुसारादित्यादिः अत्र सामान्यलक्षणमनुक्त्वा विभागासंभवा
त्तन्न्यूनताभंगाय स्वयं लक्षणमाह द्रव्यकर्मभिन्नत्वे सतीति द्रव्यभिन्नत्वे सति कर्मभिन्नत्वे सति इत्यर्थः
यथाश्रुते द्रव्यकर्मोभयत्वावच्छिन्नभेदस्यापि द्रव्यकर्मभेदशब्दप्रतिपाद्यत्वेन तादृशभेदघटितत्व
क्षणस्य द्रव्यादावपि सत्त्वात् अतिव्याप्त्यापत्तेः सामान्यवानिति सामान्याधिकरणमित्यर्थः एवं च द्रव्यभिन्न

न॰ग्र॰
३४

र्थकत्वे मानाभाव इति वाच्यं सर्वेषामपि इष्टपदाद्धर्मत्वादिनैव बोधस्या[illegible]सिद्धत्वाननुभवसि
द्धत्वाऽननुभवस्यैव प्रमाणत्वात् अत एवाहुरिष्टशब्द एव चेति गुणविभागकारिकास्था इष्टपदेन धर्मा
धर्मौ संगृह्य एते गुणाश्चतुर्विंशतिसंख्याकाः इति मुक्तावल्यां विश्वनाथपंचाननोक्तिरपि संगच्छते र
स्माहुः वस्तुतस्तु गुणत्वप्रकारकबुद्धिं प्रति गुणत्वज्ञानत्वेन हेतुतया कारणतावच्छेदकघटकत
या सिद्धगुणत्वस्य व्यक्त्यैक्यादिरूपबाधकाभावात् जातित्वसिद्धौ नादृश गुणत्वस्य सकलपुरुषेषु
मध्ये कस्यचित्तु रूपस्य रूपादिसंस्कारान्तघटकेषु केषुचिद्गुलेषु गुणव्यवहारसंभवेन विनिगम
नाविरहात्तेषु सर्वेष्वपि गुणत्वसिद्धिर्निराबाधेति प्रतिभाति मत्ते रूपेत्यादि अत्रापि संस्कारपदस्य
रूपादिसंस्कारान्तान्यतमत्वावच्छिन्ने लक्षणा रूपादिपदानि तात्पर्यग्राहकाणि एवं चतुर्विंति गुणा इ
त्यस्य चतुर्विंशतित्वसंख्यापर्याप्त्यधिकरणगुणविभाजकधर्मवंत इत्यर्थः तथा च रूपादिसंस्का

67

जातिग्रहणं समवायेन तत्स्यत्वग्रह
धेयं गुरुचरणास्तु गुणत्वजातिमत्वमिति गुणत्ववत्त्वमित्यर्थः गुणाद्यनुगतप्रतीत्या रूपादि
त्वलाभायेति व्याचक्रुः ननु गुणत्वजातौ किं मानमिति चेन्न त्वप्राचः तेषु गुणत्वग्रहाभावात् ते
षु जातिरूपनयागुणत्वसिद्धिरित्याहुः तन्न परेषां रूपादिषु संस्कारा शक्यतावच्छेदकनया
षां जातिरूपतया गुणत्वासिद्धि प्रसंगात् दीधितिकार प्रभृतयस्तु गुणपद निष्प्रत्यूहत्वात् नचैवं विभुपदार
गुणत्वजातिसिद्धिः असति बाधके शक्यतावच्छेदकतया जातिसिद्धेर्वाच्यं विभुत्वस्य शक्यतावच्छेदक
ष्टपद शक्यतावच्छेदकतया विभुत्वादृष्टत्वादिजातिसिद्ध्यापत्तिरिति वाच्यं एवमदृष्टपदस
त्वेपि भूतत्वेन सांकर्येण विनिगमनाविरहेण च विभुत्वभूतत्वयोर्जातित्वासंभवात् धारणैकजातिसिद्धिः अम
नानार्थकत्वेन धर्माधर्मत्वयोरेव तत्पद शक्यतावच्छेदकत्वान्नोभयसाधारणैकजातिसिद्ध्यापत्तेः नचादृष्टपदस्य नाना
र्थासैधवपद शक्यतावच्छेदकतया त्ववणाश्वसाधारणैकजातिसिद्ध्यापत्तेः

तियावत् तथा च गुणस्य चतुर्विंशतिधा विभागेऽयुक्त इति यावत् अवयवसंयोगविशेषरूपत्वादि
ति इदं तु कविनैकदेशिमतमाश्रित्योक्तं सिद्धान्ते तु मृदुत्वकठिनत्वयोः स्पर्शविशेषरूपत्वादिति
बोध्यं एतेन मृदुत्वकठिनत्वयोर्गुणान्तरत्वेऽवयवसंयोगविशेषरूपत्वे च स्पर्शग्राह्यत्वापत्तेरिति दूषण
स्यानवकाशः इदमुपलक्षणं वक्रत्वस्यावयवसंयोगविशेषरूपत्वादित्यपि बोध्यं कर्म विभजतेर
ति उत्क्षेपणमानुसारादित्यादिः अत्र न्यूनतापरिहाराय स्वयं लक्षणमाह कर्मत्वजातिमदिति च
त्वजातिग्रहणस्य प्रयोजनं संयोगभिन्नत्वे सतीति संयोगभिन्नत्वसंयोगासमवायिकारणत्व एतदुभ
यं लक्षणमित्यर्थः संयोगेऽतिव्याप्तिवारणाय भिन्नत्वान्तं घटादावतिव्याप्तिवारणाय कारणत्वान्तं
लघुलक्षणमाह कर्मत्वजातिमदिति अत्र जातिग्रहणस्य प्रयोजनं पूर्ववद्बोध्यं अत्रापि न्यूनतेव ऊ
वचनान्तगमनशब्दस्योत्क्षेपणादिगमनान्तान्यतमत्वावच्छिन्नमर्थः उत्क्षेपणादिपदानां तात्पर्यमाह

रं तान्यतमाभिन्नाः चतुर्विंशतित्वसंख्यापर्याप्त्यधिकरणगुणविभाजकधर्मवंतइत्यर्थलाभा
न्नोक्तदोषः परं तु रूपरसगंधस्पर्शाः संख्यापरिमाणे पृथक्त्वं संयोगविभागपरत्वापरत्वबुद्धयः सु
खदुःखेच्छाद्वेषप्रयत्नाश्चेति कणाद[illegible]सूत्रविरुद्धत्वात् सूत्रस्य चशब्देन गुरु
धर्मा त्वद्रवत्वस्नेहसंस्कारधर्मशब्दाः समुच्चीयंते इति प्रशस्तपादभाष्यविरोधाच्चेति नादृशगुणविभागे
वीजाभाव इत्येवदोषइत्यपि बोध्यं अत्र वहूनां गुणविभाजकधर्माणांसत्वाजेष्ठ कथं चतुर्विंशतित्व
संख्यापर्याप्तिरित्याक्षिपति दीपिकायां नन्विसादिना लघुत्वम् इत्त कठिनत्वादीनामिति लघुत्वमृ
दुत्वत्वकठिनत्वत्वादिरूपगुणविभाजकधर्मावच्छिन्नानामित्यर्थः आदिना वक्रत्वावच्छिन्नपरिग्रहः
विद्यमानत्वादिति प्रमिनत्वादित्यर्थः कथं चतुर्विंशतिर्गुणा इति कथं चतुर्विंशतित्वसंख्यापर्याप्त्य
धिकरणगुणविभाजकधर्मवंत इत्यर्थः गुणविभाजकधर्मेषु कथं चतुर्विंशतित्वसंख्यापर्याप्तिरि

त्व
त्व

ननूत्क्षेपणादीनामपि गमनत्वाश्रयत्वात् उत्क्षेपणत्वादीनामपि गमनत्ववैयधिकरण्याभावात्
तेषामपि कर्मविभाजकत्वानुपपत्तेरिति चेन्न अस्तु भाष्यग्रंथानुसारेण ग्रंथकर्तृत्वरूपपारतन्त्र्यवि
शिष्टानामस्मदादीनां परस्परवैयधिकरण्यापन्नानामेव विभाजकतेति तदुक्तनियमांगीकार
स्यावश्यकत्वेपि स्वतन्त्राणां सूत्रतद्भाष्यकाराणां तादृशनियमांगीकारस्यानावश्यकत्वात् अन्यथा
तेषामप्यस्वातन्त्र्यापत्तेः एवं च तेषां नियोगपर्यनुयोगानर्हतया तैर्गमनत्वसामानाधिकरण्यापन्नो
त्क्षेपणत्वादिना कृतस्य कर्मविभागस्यादोषत्वादिति मूले परमपरं चेति चरमपदं लक्षणया परापर
भिन्नमित्यर्थः द्विविधमिति द्वे विधे यस्येति व्युत्पत्त्या सामान्यविभाजकप्रकारद्वयान्यतरविशिष्टमित्य
र्थः दीपिकायां सामान्यमिति क्रमप्राप्तमित्यादिः अत्र नित्यत्वे सत्यनेकसमवेतत्वं सामान्यस्य लक्षणं
ननु सामान्यस्याद्रव्यतया दैशिककालिकपरत्वापरत्वानाश्रयत्वात् परमपरं चेति मूले सामान

71

काण्येव पंचकर्माणीत्यत्र पंचपदसमभिव्याहृतकर्मपदस्य पंचत्वसंख्यापर्याप्त्यधिकरणकर्मविभा
जकधर्मावच्छिन्नमर्थः एवं चोत्क्षेपणादिगमनान्तान्यतमाभिन्नानि पंचत्वसंख्यापर्याप्त्यधिक
करणकर्मविभाजकधर्मावच्छिन्नानीति वाक्यार्थबोधः ननु कर्मविभाजकधर्माणां बहूनां
सत्वात्तेषु कथं पंचत्वसंख्यापर्याप्तिरित्याशंकां परिहरति दीपिकायां भ्रमणादीनामपी
ति एवार्थकापिशब्दः अंतर्भावादित्युत्तरं प्रयोज्यं भ्रमणरेचनस्पंदनोर्ध्वज्वलनतिर्यग्गम
नानामित्यर्थः गमनेन्तर्भावादिति गमनत्वाश्रयत्वादेवेत्यर्थः न पंचत्वविरोध इति कर्म
विभाजकधर्माणां पंचत्वसंख्यापर्याप्त्यधिकरणत्वभंग इत्यर्थः तथा च परस्परवैयधि
करणापन्नानामेव विभाजकता वाच्या अन्यथा घटत्वादीनामपि द्रव्यविभाजकतापत्तेः एवं
च भ्रमणत्वादीनां गमनत्ववैयधिकरण्याभावात् न तेषां विभाजकत्वसंभव इति भावः

वा

न॰ प्र॰ २८

अनवस्थारूपजातिबाधकसत्वात् सामान्यत्वं न जातिः एवं च सत्तापेक्षयाऽपि कदेशवृत्तिजात्यभावात्
सत्ताद्यधिकरणजात्यभाँश्च सत्तायां सकलजात्यपेक्षयाव्यापकत्वं निराबाधमिति भावः विशेषविभज
तइति क्रमप्राप्तमित्यादिः नित्यद्रव्याणि कानीत्याशंकायामाह पृथिव्यादीति मूले [illegible] नतु एवेति

प

स्याश्रयव्यक्तिभेदेन भिन्ना इत्यर्थः तथा च विशेषो नानेकसमवेत इति भावः अत्र एकमात्रसमवेतत्वेस
तिसामान्यशून्यत्वं विशेषलक्षणं बोध्यं दीपिकायां समवायस्य भेदो नास्तीत्याहेति समवायस्य विभा
जकधर्मो नास्तीत्याहेत्यर्थः अत्र नित्यत्वे सति संबंधत्वं वक्ष्यमाणं समवायलक्षणं बोध्यं मूले अभाव
श्चतुर्विध इति चतुष्टसंख्यापर्याप्त्यधिकरणभावविभाजकधर्मान्यतमवानित्यर्थः प्रागभाव इत्यादि

पा

अत्रापि चरमपदं लक्षणं प्रागभावाद्यन्योन्याभावान्तान्यतमत्वावच्छिन्नताभः तथा च तादृशान्यत
माभिन्नं च तुष्टसंख्यापर्याप्त्यधिकरणभावविभाजकधर्मान्यतमवानिति वाक्यार्थः अत्र ग्रंथान्तरे

२८

सविभागकरणमनुचितं इत्याशंकायां पारिभाषिकपरत्वापरत्वादिनिर्वचनेन परिहरति दीपिकायां पर
मधिकदेशवृत्तीति व्यापकमित्यर्थः अपरं न्यूनवृत्तीति व्याप्यमित्यर्थः अत्र निखिलजातिघटकप्रत्ये
कनिरूपकं तादाश्रयत्वात् सत्तायाः सकलजात्यपेक्षया परत्वं [illegible]त्वसमानाधिकरणनिखिलजातिघटक
प्रत्येकनिरूपितव्यापकताश्रयत्वाच्च द्रव्यत्वादेः परत्वमपरत्वं च स्वीकार्यमित्याशय इति बोध्यं ननु सत्ता
याः सकलजात्यपेक्षया व्यापकत्वमनुपपन्नं भावत्वप्रमेयत्वादिजातिनिरूपितव्यापकत्वाभावात् इ
त्याशंकां परिहरति सामान्यादिचतुष्टय इति सामान्याद्यभावान्यतमत्वावच्छिन्न इत्यर्थः जातिर्नास्ती
ति जातिर्न तिष्ठतीत्यर्थः तथा च द्रव्यादिर्भावः द्रव्यादिः प्रमेय इत्यनुगतप्रतीत्या भावत्वप्रमेयत्वानुग
तधर्मसिद्धावप्येवं घरूपजातिबाधकसत्त्वान्नैषां जातित्वं द्रव्यादिषु चैवानुगतप्रतीतिरेव नास्ति
समवायस्यैकव्यक्तित्वात् समवायत्वेन जाति रूपहानिरूपजातिबाधकसत्त्वाद्विशेषत्वं न जातिः
ते

व्यापक

74

सोऽप्यभाववत्त्वाभिन्नप्रकारचतुष्टयान्यतमविशिष्टाभिन्नो भाव इति वा कार्य्यः फलित इति व्याच
ष्टे: दीपिकायामभावं विभजत इति क्रमप्राप्तमित्यादिः अत्र द्व्यादिसमवायानान्यतमत्वावच्छि
न्नप्रतियोगिताकभेदवत्त्वमभावसामान्यलक्षणमिति ध्येयं अत्र द्रव्यादीनां यथासंभवं विभा
गानन्तरं आदौ पृथिव्या लक्षणाभिधाने बीजमाह अत्रेति सप्तपदार्थघटकनवद्रव्येषु मध्य
इत्यर्थः उद्देशक्रमानुसारादिति विभागवाक्ये पृथिव्युपस्थापकपदस्यैव प्राङ्निर्दिष्टत्वानुसारादि
त्यर्थः प्रथमोपस्थितिरूपत्वात्प्रथमादिति फलितार्थः प्रथममिति जलादिलक्षणात् प्रागित्यर्थः नच
विभागवाक्ये जलादेरेव प्राङ्निर्देशं कुतो न कृतः नच सूत्रकृता विभागवाक्ये पृथिव्या एव प्राङ्निर्दि
ष्टत्वात्तदनुरोधेन मूलकृतापि प्रथमं पृथिव्येव निर्दिष्टेति वाच्यं प्रथमतः पृथिव्या निर्देशो नि
यामकाभाव इत्यत आह उद्देशक्रमे चेति सर्वत्रोद्देशक्रम इति योजना इच्छैव नियामिकेति न यावत्

संसर्गाभाववत्त्वान्योन्याभाववत्त्वाभ्यामाद्यो विभागः अनंतरं संसर्गाभावस्य प्रागभाववत्त्वादिधर्मैस्त्रिधावि-
द्धर्मैर्न्यनाभावा इति वाक्यार्थः अत्रेदं बोध्यं चान्तरे... भागो दृष्टः। न त्वयापि प्रागभाववत्त्वादिना विभागस्या-
वश्यकत्वे किमनंतर्गडुना संसर्गाभावत्वेन विभजनेनेत्याशयेन मूलकृता तथा विभागो न कृत इति ध्ये-
म यं अस्मत्कृतचरणास्तु परंपरं चेति द्विविधं सामान्यमिति अत्र परापरशब्दयोर्भावप्रधाननिर्देशात्प-
रत्वमपरत्वं चेति अर्थलाभः इति शब्दस्याभेदोर्थः द्विविधमिति बहुव्रीहिघटकचरमपदस्य प्रका-
रद्वयान्यतरविशिष्टोर्थः पूर्वपदं तात्पर्यग्राहकं तथा च परत्वापरत्वाभिन्नप्रकारद्वयान्यतरविशि-
ष्टं सामान्यमिति वाक्यार्थः फलितः एवमभावश्चतुर्विध इत्यत्रापि बहुव्रीहिघटकोत्तरपदस्य प्रका-
रचतुष्टयान्यतमविशिष्टोर्थः पूर्वपदं तात्पर्यग्राहकं प्रागभाव इत्यादि अत्र चतुर्णां पदानां भावप्रधा-
ननिर्देशात् प्रागभावत्वादिकमर्थः इति शब्दस्याभेदोर्थः प्रागभावत्वप्रध्वंसाभावत्वात्यंताभावत्वा

76

न॰प्र॰
३९

कारादितिचित्रगंधस्यास्वीकृतत्वादित्यर्थः तथा च तादृशघटादिविशेष्यकप्रमितोऽसमवायघटि
तसामानाधिकरण्यसंबंधेनरूपावयवसमवेतस्सौरभ्यादेरेव प्रकारत्वसंभवात् प्रमाणा
न्तरस्य चाभावाच्चित्रगंधस्याप्रामाणिकतया तादृशघटाद्यवृत्तित्वलक्षणस्याव्याप्तिर्दुर्वा
रेतिभावः प्रांचस्तु एतावता देशिकाव्याप्यवृत्तित्वानंगीकर्तृप्राचीनमते व्याप्तिमुक्त्वा देशिका
व्याप्यवृत्तित्वांगीकर्तृनवीनमतेनानागंधावयवारब्धद्रव्ये व्याप्यवृत्तिसौरभ्यादिसमुदाय
स्योत्पत्तिसंभवेन नाव्याप्तिप्रसक्तेः तन्मतेपि स्पष्टविशेषे ऽव्याप्तिमाह किंचेति उत्तरग्रंथम
वतारयंति तदसत् नवीनमते उत्पन्नविनष्टद्रव्यांगीकारासंभवस्य दूषितत्वेन किंचेत्याद्यु
क्तग्रंथस्य तन्मताभिप्रायकत्वासंभवात् अत एव वस्तु प्राचीनमते स्पष्टविशेषेपि अव्याप्तिमा
ह किंचेतीत्यवतारयंति वस्तुतस्तु ननु सुरभ्यसुरभ्यवयवारब्धद्रव्येनाव्याप्तिः तत्र गंधस्वीकारा

१

77

३९

तेषां सर्वज्ञत्वात्स्वेच्छयैव द्रव्यगुणादिविभागे तथानिर्देशास्तैः कृत इति न च पर्यनुयोगेन कार्य इतिभा
वः ॥ अत्र गंधवती पृथिवीति मूलांगंधवत्वं गंधाधिकारणत्वं वा पृथिवीलक्षणमिति लभ्यते तदनुप
पन्नमित्याक्षिपति नन्विति परस्परविरोधेनेति सुरभ्यसुरभ्योरेकत्र वर्तमानत्वासंभवेनेत्यर्थः जपोदी
कायाप्यवृत्तित्वाभावादित्याशयः गंधानुत्पादादिति गंधसामान्यस्योत्पत्त्यसंभवादित्यर्थः प्रवाप्रि
तिगंधाधिकरणत्वलक्षणस्यापीत्यादिः गंधप्रतीत्यनुपपत्तेरिति तादृशद्रव्यवृत्त्यादिः गंधप्रकारक
प्रमानुपपत्तेरिति त्वर्थः तथा च तत्रसौरभ्यादिगंधोत्पत्त्यसंभवेपि तादृशप्रमान्यथानुपपन्ना
चित्रगंधांगीकारस्यावश्यकतयानोक्ताव्याप्त्यवकाशः ऽवयवगंधस्यैवेति कपालादिसमवे
तसर्वानुमतसौरभ्यादेरेवेत्यर्थः एवकारेणावयविगंधो व्यवच्छिद्यते नत्वेति तादृशघटादावि
त्यर्थः प्रतीतिसंभवेनेति गंधवानिति प्रमात्मकप्रतीतिविषयत्वौचित्येनेत्यर्थः चित्रगंधांगी

त्वस्याप्यभावादिति भावः गंधसमानाधिकरणेत्यादि गंधाधिकरण १

न.प्र.
४०

दृशघटादावित्यर्थः आदिनोत्पन्नविनष्टपृथिवीमात्रपरिग्रहः अव्याप्तिरिति तत्र गंधाधिकरणे वृत्तेः
द्रव्यत्वापरा ~~[illegible] पृथिव्यां कालिकसंबंधेन वर्तमानजलत्वादिकमादाय नातिव्याप्तिः तं~~
~~[illegible]~~ पा जातिः तद्वत्त्वस्य गंधवती पृथिवीति लक्षणवाक्यतात्पर्यविषयत्वादित्यर्थः अत्र जलत्वा
दिकमादायजलादावतिव्याप्तिवारणाय गंधसमानाधिकरणेति गंधाधिकरणत्वं न द्वत्तित्वं च सम
वायेन विवक्षितं तेन कालिकेन गंधाधिकरणजलादौ वर्तमानं समवायेन गंधाधिकरणपृथिव्यां
कालिकसंबंधेन वर्तमानजलत्वादिकमादाय नातिव्याप्तिः सत्तादिकमादाय तत्रैवातिव्याप्तिवार
णाय द्रव्यत्वापरेति अत्र द्रव्यत्वापरत्वं द्रव्यत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकं त्वे सति
द्रव्यत्वसमानाधिकरणत्वरूपं न तु द्रव्यत्वाभाववद्वृत्तित्वरूपं द्रव्यत्वस्यापि तादृशत्वेन तद्दोषता
द्वस्यात् द्रव्यत्वापरजातिमत्त्वं समवायेन वाच्यं तेन कालिकसंबंधेन पृथिवीत्वमादायन तद्दोष

धि

79

त

तथाहि तादृशघटादिविशेष्यकसौरभ्यप्रकारकप्रत्ययः परंपरासंबंधेनावयवगंधविषय
कः तथा सति नानागंधवत्त्रसरेणुकचतुष्टयारब्धजन्यचतुरणुकादिविशेष्यकगंधमानुपपत्तिः त्र
सरेणौ रूपं विहाय सर्वेषां गुणानामयोग्यत्वेन त्रसरेणुसमवेतगंधविषयकत्वासंभवात्
त्रसरेणुगंधस्यापि योग्यत्वमंगीकृत्य चतुरणुकादिविशेष्यकगंधप्रतीत्युपपादने नानागं
धवद्व्यणुकत्रयारब्धत्र्यणुके गंधप्रतीत्यनुपपत्तिर्द्व्यणुकगंधस्यातीन्द्रियत्वेन तद्विष
यकत्वेन तादृशप्रत्ययोपपादनासंभवात् तस्माच्चित्ररूपवच्चित्रगंधमप्यंगीकृत्यैव तादृशत्र्य
णुकादौ गंधप्रत्ययस्योपपादनीयतया चित्रगंधांगीकारस्यावश्यकत्वेन नानागंधवदवयवार
ब्धघटादावपि कारणसत्त्वाच्चित्रगंधांगीकारस्यावश्यकत्वमेवेति एवं च नानात्वाव्याप्तिरित्याशये
नस्यत्तांतरेऽव्याप्तिमाह किंचेतिरस्येवतत्त्वं उत्पन्नविनष्टघटादाविति प्राचीनैकदेश्यनुमतता

४०

न·प्र·
४१

जातौ मानाभाव इति वाच्यं गंधसमवायिकारणताकिंचिद्धर्मावच्छिन्नाकारणतात्वात् एतन्निरूपकार
तावदित्यनुमानस्यैव प्रमाणत्वात् तस्मात्तादृशकारणतावच्छेदकतयाऽनुगतधर्मसिद्धौ व्यक्त्यैक्या
दिरूपजातिवाधकाभावे जातिरूपतयैवतादृशधर्मः सिध्यति तदेव पृथिवीत्वमित्युच्यत इति न
किंचिदनुपपन्नं एवं जलादिप्रतियोगिकभेदचतुर्दशत्वावच्छिन्नं पृथिव्यामुहारिकलक्षणमित्य
पि वोध्यं इदानीं येन येन संवंधेन यो यो यस्य यस्य व्यावर्तकः व्यावहारिको वा तस्य तस्य तेन संवंधेन तत्त
द्धर्मवत्वं लक्षणमिति व्यवस्थापयितुं शंकादावाक्षिपति नन्विति तथापीति पृथिवीलक्षणस्योक्तरीत्याऽव्याप्
ति व्याप्तिवारणेऽपीत्यर्थः कालस्येति महाकालस्येत्यर्थः सर्वाधारतयेति कालिकसंवंधेनेत्यादिः एतेन
महाकाले कालिकसंवंधेन सकललक्षणानां सत्वमाविष्कृतं सर्वेषां लक्षणानामिति उक्तवक्ष्यमाणव्या
वर्तकव्यावहारिकसकललक्षणानामित्यर्थः कालइति उक्तलक्षणलक्ष्यतावच्छेदकतत्तद्धर्मस्य

41

४८

षतादृवस्थं एतल्लाभायैव जातिमत्वमित्युक्तं न तु जातित्वेनापि निवेशः गौरवात् प्रयोजनाभावा
च्च न चैवमपि मूर्त्तत्वजात्यभ्युपगमपक्षे तस्यापि तादृशजातित्वमादाय यातिव्याप्तिः ईश्वरे वेतिवा
च्यं मूर्त्तत्वान्यत्वेनापि तादृशजातेर्विशेषणीयत्वात् वस्तुतस्तु द्रव्यत्वापरजातेर्न तत्त्वेन निवे
शः गौरवात्प्रयोजनाभावाच्च किंतु जलत्वासमवेतत्वेन न याच गंधसमानाधिकरणजलत्वासमवेत
जातिमत्वमिति लक्षणं फलितं अतो न कश्चिद्दोष इति प्रतिभाति ननु सुगंधिपालितं सुरभिः स
मीरण इत्याद्यनुभवाज्जलादावपि गंधसिद्ध्यानिरुक्तलक्षणं जलादावतिव्याप्तमिति चेन्न स्फटिके
जपाकुसुमसमवेतलौहित्यस्येवान्वयव्यतिरेकाभ्यां पृथिव्यादिरूपोपाधिसमवेतगंधस्यैव स्वसम
मवायिसंयुक्तत्वसंबंधेन तत्र भानांगीकारात् अन्यथा तादृशोपाधिसंबंधशून्यकालेपि न तादृशा
नुभवापत्तेः एवं च न कश्चिद्दोषः इदमुपलक्षणं पृथिवीत्वजातिमत्वमपि पृथिव्या लक्षणं न च निरश

न.प्र.
५२

सकलसंबंधेनकस्यापिलक्षणस्यावर्तमानत्वेनासंभवापत्तेः तादृशसंबंधत्वोपलक्षितसमवा
यादिरूपयत्किंचित्संबंधेनगंधवत्वादिरूपलक्षणानां वर्तमानत्वेपि गंधाधिकरणत्वादिरूप
लक्षणानामवर्तमानतयातेषामसंभवरूपदोषयुक्तत्वस्य दुर्वारत्वात् तस्मादस्मदुक्तरीत्यैवा
र्थोवाच्यइतिदिक् पृथिवींविभजतइतिश्रोतसमवेतजिज्ञासाविशेषनिवृत्त्यर्थमित्यादिः अत्रपृ
थिवीपदसमभिव्याहृतद्वितीयायाः सविषयार्थकधातुसमभिव्याहारबलात्तविषयत्वंविष
यित्वंवार्थः विपूर्वकभजधातोरवांतरधर्मप्रकारकज्ञानानुकूलव्यापारोर्थः आख्यातार्थःकृ
तिः तत्रप्रकृतेर्थेपृथिवीत्वावच्छिन्नस्याधेयतासंबंधेन निरूपितत्वसंबंधेनवाद्वितीयार्थेन्वयः
तस्यनिरूपकतासंबंधेनस्वरूपसंबंधेनवाधुनरक्तेवैविज्ञानाख्यधात्वर्थैकदेशेन्वयः विशिष्टधात्वर्थ
स्यानुकूलतासंबंधेनाख्यातार्थेन्वयःतस्यसमवायसंबंधेनप्रथमांतार्थेन्वयःउक्तान्वयरीत्याश्र

८३

महाकालत्वमर्थः अतिव्याप्तिरिति कालिकसंबंधेन वर्त्तमानत्वप्रयुक्तातिव्याप्तिरूपदोषग्रस्तत्वमि
त्यर्थः तथा च सर्वेषां लक्षणानां दुष्टत्वाद्यावर्त्तकत्वव्यावहारिकत्वान्यतररूपप्रयोजनवत्त्वं न संभव
तीति भावः सर्वाधारतेत्यादि यस्य यस्य येन येन संबंधेन यो यो व्यावर्त्तको व्यावहारिकं च तस्य तस्य
तेन तेन संबंधेन तत्तद्धर्मवत्त्वस्यैव लक्षणत्वेन तात्पर्यविषयत्वादित्यर्थः तथा च महाकाले तेन
तेन संबंधेन तत्तल्लक्षणसत्त्वाभावान्न तेषामतिव्याप्तिरूपदोषवत्त्वमतो नोक्तानुपपत्तिरिति भा
वः प्राचस्तु सर्वाधारताप्रयोजकसंबंधभिन्नसंबंधेनेति कालिकविशेषणतादैशिकविशेषणता
ताभिन्नसंबंधेनेत्यर्थ इत्याहुः तदसत् निरुक्तविशेषणताभिन्नसंबंधत्वावच्छिन्नसांसर्गिकवि
षयताशालिप्रतीत्यभावेन तेन रूपेण संसर्गतायां मानाभावात् न च तादृशविशेषणताभिन्न
त्वविशिष्टसंबंधत्वोपलक्षितानां समवायादीनां संसर्गत्वे तात्पर्यान्नोक्तदोष इति वाच्यं तादृश

न॰प्र॰
४२

तात्पर्यविषयत्वात् नित्यानित्याचेति नित्यत्वमनित्यत्वंचेत्यर्थः इति शब्दोऽभेदार्थकः तथाचनित्य
त्वानित्यत्वाभिन्नप्रकारद्वयान्यतरविशिष्टापृथिवीति वाक्यार्थः तत्रकार्यपृथिवी नित्यत्वविशिष्टकार्य
वानित्यत्वविशिष्टेत्याकांक्षायांनित्यापरमाणुरूपेत्यादि परमाणुरूपापृथिवी नित्यत्वप्रकारविशि
ष्टा परमाणुभिन्नाद्व्यणुकादिःसर्वापृथिवीत्वनित्यत्वप्रकारविशिष्टेत्यर्थः तत्रनित्यत्वादिपदार्थं निर्व
क्ति दीपिकायांनित्यत्वमिति ध्वंसाप्रतियोगित्वमिति ध्वंसप्रतियोगिव्यक्त्योयावंत्यस्तत्तद्व्यक्तित्वाव
च्छिन्नप्रतियोगिताकभेदकूटवत्त्वंतावदन्यतमत्वावच्छिन्नप्रतियोगिताकैकभेदवत्त्वमितिवार्थः
तेन ध्वंसस्यप्रतियोगिव्यक्तिभेदेन भिन्नतयाएकैकध्वंसप्रतियोगिभिन्नत्वरूपध्वंसाप्रतियोगित्व
स्य ध्वंसांतरप्रतियोगिसाधारण्येपिनक्षतिः इदमुपलक्षणंमहाकालावृत्त्यभावत्वासमानाधि
करणकालिकविशेषणतात्वावच्छिन्नप्रतियोगिताकाभाववत्त्वरूपमनुगतंसुज्ञेयंनित्यत्वमित्यपि

द्वेषो द्रष्टव्यः तथा च प्रकृते लक्षणवाक्यात् लक्षणे लक्षसाधारणधर्मे ज्ञाने जाते साधारणधर्मप्र
कारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासां प्रति हेतुतया तादृशकारणवत्त्वात्कृतिविधा पृथिवी
ति विशेषधर्मप्रकारकजिज्ञासोत्पन्ना भ्रान्तु तादृशजिज्ञासानिवृत्त्यर्थं साहि विधेति मूलकृता वि
भागः कृत इति श्राशय प्रकाशाय पृथिवी विभजते इत्युक्तवान् दीपिकाकार इति प्रतिभाति पंच
तु उक्तलक्षणलक्षितस्यानित्यत्वेऽवयवानवस्थापत्तिः नित्यत्वे कार्यस्य गंधवतो द्रव्यांतरत्वा
पत्तिरतस्तादृसा हि विधेति मूलमवतारयंति एतन्मते पृथिव्या विभुत्वाणुत्वविचारवन्नित्यत्वानि
त्यत्वविचारस्याप्यजिज्ञासितार्थाभिधानरूपत्वेनार्थान्तरदोषप्रसंगः एतद्दूषणस्यास्मदुक्ताभि
प्रायकत्वस्वीकारात्तनैष दोष इति मूले सा हि विधेति अत्र वदुक्ती हि घटकविधाशब्दस्य प्रका
रवद्यान्तरविशिष्टे लक्षणा हि शब्दस्तात्पर्यग्राहकः वदुक्ती हेतुनरपदस्य लाक्षणिकतयान्नादि

न.प्र.
४४

तत्सर्वोपस्थितिविषयत्वादित्याहुः तन्न तादृशान्तरं परासाधारणोपभोगसाधनत्वरूपविषयत्वस्य
द्व्यणुकादाविव परमाणुष्वपि सत्वात् तेषां तदप्रतिपादनेन मूलकारस्य न्यूनतापत्तेः मृते शरीरे
न्द्रियविषयभेदादिति अत्र द्वंद्वोत्तरश्रूयमाणभेदशब्दस्याभिप्राये ते व्याख्यातेऽनेनेति तत्सत्त्वाऽसाधा
रणधर्मोर्थः एवं च द्वंद्वोत्तरश्रूयमाणभेदशब्दार्थस्य द्वंद्वप्रतिपाद्यतावच्छेदकैकधर्मावच्छिन्ने
नान्वयस्यानादितात्पर्ये विषयतया योग्यतया च शरीरनिष्ठो भेदः इंद्रियनिष्ठो भेदः विष
यनिष्ठो भेद इत्यर्थस्तलाभः तथा च शरीरादिनिष्ठासाधारणधर्मस्य शरीरत्वेंद्रियत्वविषय
त्वात्मकतया पंचम्यंतशरीरेंद्रियविषयभेदशब्देन शरीरत्वेन्द्रियत्वविषयत्वानि लभ्यंते तेन तदुत्त
रपंचम्याः धान्येन धनवानित्यत्र त्रितीयाया इव भेदार्थकत्ववदन्यत्रापि भेदार्थः स्वीक्रिय
तेतस्य त्रिविधत्वे सत्र प्रकारत्रयेनयः इत्थं च शरीरत्वेंद्रियत्वविषयत्वाभिन्नप्रकारत्रयान्यतमवि

87

व

४४

वोध्यं ध्वंसप्रतियोगित्वमिति याववंति प्रतियोगित्वानि तावदन्यतमत्वावच्छिन्नवत्त्वमर्थः तेन ध्वंसव्यक्ति
भेदेन प्रतियोगिव्यक्तिभेदेन च प्रतियोगितानां भिन्नत्वात् एकैकवृत्तितादृशप्रतियोगितायां अन्यत्रा
वृत्तित्वेपि न क्षतिः वस्तुतस्तु स्वरूपकालिकोभयसंबंधेनाभाववत्त्ववत्त्वमेव सकलध्वंसानुगतं
[illegible]नां ध्वंसत्वं अभाववत्त्वस्यानुगतत्वात् तादृशध्वंसत्वाश्रयप्रतियोगित्वे स्वीयकालिकदेशिक
विशेषणत्वाश्रयप्रतियोगित्वसंबंधेनाभाववत्त्ववत्त्वपर्यवसितं अनित्यत्वं एवं च नाननुगमः न वा उ
त्नैयत्वमिति प्रतिभाति ॥ नन्वस्त्रिविधेति मूलेन याद्विविधा सेव त्रिविधेत्यर्थो लभ्यते न त्वष्टवं विभाजकधर्म
द्वयघटितधर्मत्रयमादाय त्रैविध्यशंकां निराकर्तुं तादृशग्रंथमवतारयति दीपिकायां प्रकारांतरेण
तिसृवविभाजकधर्मभिन्नधर्मेणेत्यर्थः तथा च पृथिवीसामान्यसेव द्वैविध्येन त्रैविध्येन च विभागइ
तिभावः सोचस्तु ॥ नन्वस्त्रिविधेति कापेरूप पृथिवीप्रकारत्रयान्यतमाविशिष्टेत्यर्थः तस्या एवावहि

88

भवतीतितद्रूपेष्यलक्षणांतरमनुसंतन्मितिध्येयं इत्युक्तं चात्मसमवेतएवभोगइतिस्फुटीकरणायनतुत
स्यापिलक्षणप्रवेशः व्यर्थत्वात् तु क्रार्थं प्रकाशयति यदवच्छिन्नेतियाहृदिशेष्टत्यर्थः आत्मनीत्यत्र
सप्तम्यानिरूपितत्वमर्थः तस्यजायतेइत्यत्रधात्वर्थोत्पत्तावन्वयः भोगोजायतइति समवायसंबंधा
वच्छिन्नोत्पत्तिमान् भोगइत्यर्थः तथाचयाहृदिशात्मनिरूपितसमवायसंबंधावच्छिन्नोत्पत्तिमान् भो
गइतिफलितार्थः तद्भोगायतनमितितदेवभोगावच्छेदकमित्यर्थः भोगपदार्थमाहसुखेतिसुख
दुःखान्यतरनिष्ठलौकिकविषयताशालिसाक्षात्कारइत्यर्थः एतेनेश्वरसाक्षात्कारस्यसर्वविषयक
त्वेनसुखादिविषयकतयातस्यापिभोगपदार्थत्वात् भोगत्वावच्छेदेनजननान्वयासंभवान्नदव
च्छेदकाप्रसिद्धेश्चबाधवारणायचात्मपदस्यजीवपरत्वमंगीकृत्यतस्यशरीरलक्षणघटकतामंगीकृ
त्यभगवत्तज्ञानस्यजीवसमवेतत्वाभावान्नजीवसमवेतभोगत्वावच्छेदेनजननान्वयसंभवाच्चा

शिष्टपृथिवीतिवाक्यार्थः एवमुत्तरत्राप्यर्थो द्रष्टव्यः प्राञ्चस्तु शरीरेंद्रियविषयभेदादित्रशा
रीरादिशब्दानां भावप्रधाननिर्देशात् शरीरत्वेंद्रियत्वविषयत्वानि लभ्यंते द्वंद्वोत्तरश्रूयमाण
भेदशब्दस्यान्योन्याभावोर्थः पंचम्याः प्रयोज्यत्वमर्थः तस्य प्रकारत्रयेन्वयः तथाच शरीरत्वेंद्रि
यत्वविषयत्वनिष्ठभेदप्रयोज्यप्रकारत्रयान्यतमवद्विशिष्टा पृथिवीतिवाक्यार्थः शरीरत्वादिधर्मा
णां परस्परभेदसत्त्व एव पृथिव्याः प्रकारत्रयवत्त्वं तेषां भेदाभावे प्रकारत्रयवत्त्वाभाव इति तस्य
त्रानियतसत्ताकत्वरूपं तत्प्रयोज्यत्वं प्रकारत्रयवत्त्वस्य निराबाधमित्याहुः अत्र पार्थिवशरीरादी
नां लक्षणानुक्तेर्न्यूनतेति तत्परिहाराय स्वयं लक्षणानि वक्तव्यानि तत्र पार्थिवशरीरादि
लक्षणानां शरीरसामान्यादिलक्षणघटिततयाग्रे शरीरादिसामान्यानां क्रमेण लक्षणान्याह आ
त्मनवृत्त्यादि अत्र पृथिवीत्वादिना सांकर्येण शरीरत्वस्य जातिरूपत्वाभावात् तद्घटलक्षणं न सं

प्रमाणोपन्यासायननस्यापि लक्षणघटकतावर्ण्यत्वात् एवंचनकश्चिद्दोषइतिव्याचक्षुः इंद्रियसा
मान्यलक्षणमाह शब्देतरोद्भूतेति शब्देतरोद्भूतायेविशेषगुणाः तदनाश्रयत्वे सतीत्यर्थः ज्ञान
कारणेति ज्ञानकारणीभूतोयोमनःसंयोगः तदाश्रयत्वमित्यर्थः आत्मादावतिव्याप्तिवारणा
यसत्यंतं श्रोत्रेंद्रियेऽव्याप्तिवारणायसत्यंतदले शब्देतरेति ~~प्राणादावव्याप्तिवारणायसत्यंतं श्रोत्रें~~
~~द्रियेऽव्याप्तिवारणायसत्यंतदले शब्देतरे~~ति प्राणादावव्याप्तिवारणाय उद्भूतेति उद्भूतत्वंनजा
तिः शुक्लत्वादिनासांकर्यात् नचशुक्लत्वादिव्याप्यंनानैवोद्भूतत्वमतोनोक्तदोषइतिवाच्यं तथास
तिव्यतिरेकव्यभिचारेणचाक्षुषत्वावच्छिन्नंप्रतिउद्भूतत्वविशिष्टरूपत्वेनहेतुत्वभंगप्रसंगात
किंतुशुक्लत्वादिव्याप्यमनुद्भूतत्वंनानातदभावकूटश्चोद्भूतत्वमितिस्वीकार्यं एवंचनारदशोद्भूतगु
णःसंयोगादिरपीतितदनाश्रयत्वाभावात् असंभववारणायविशेषेति तत्त्वंचाग्रेस्वयमेववक्ष्यति

९१

वाधः एवं च जीवसमवेतभोगावच्छेदकत्वं शरीरलक्षणं पर्यवसितमिति नासंभवप्रसक्तिरिति
केचित्तु कं प्रत्युक्तं ईश्वरसाक्षात्कारस्य लौकिकविषयताशालित्वाभावात् प्रान्वस्तु साक्षात्कार
पदं जन्यसाक्षात्कारपरमित्याहुः अत्र लौकिकविषयताशालिसाक्षात्कारावच्छेदकत्वमेवल
क्षणमुचितं लौकिकविषयतायां सुखादिवृत्तित्वनिवेशे प्रयोजनाभावात् यद्वा नादृशसाक्षात्कार
स्य लौकिकविषयताशालिसाक्षात्कारत्वेनापि न निवेशः गौरवात् प्रयोजनाभावात् किंतु मानसत्वे
न एवं च मानसत्वावच्छिन्नावच्छेदकत्वं लक्षणमिति फलितं एवं च न कोपि दोष इति प्रतिभाति इदमु
पलक्षणं चाक्षुषत्वापरवच्छिन्नावच्छेदकत्वं सुखत्वाद्यवच्छिन्नावच्छेदकत्वं च तल्लक्षणमित्य
पि बोध्यं अस्मद्गुरुचरणास्तु सुखदुःखसाक्षात्कार इति साक्षात्कृतं सुखदुःखं चेत्यर्थः तथा च सुखाद्यव
च्छेदकत्वं शरीरलक्षणमिति फलितं सुखादीनां साक्षात्कारविषयत्वप्रतिपादनं सुखादौ प्रमाण

न.प्र.
४१

योगिताककालीयभेदकूटानिवेशनमेवोचितं लाघवात् सत्यं तदलस्यापि तादृशाविशेष
गुणाश्रयत्वोपलक्षितव्यक्तिनिष्ठनिरुक्तानुगतधर्मावच्छिन्नप्रतियोगिताकभेदकूटा
र्थकत्वसंभवात्पा च तादृशानुगतधर्मावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वमेव सत्त्वं तात्पर्यः
अथ वा तादृश[illegible]गुणाश्रयत्वोपलक्षितायोद्भूतस्पर्शत्वावच्छिन्नावच्छेदकताकप्रतियो
गिता तान्निरूपितभेद आत्मत्वावच्छिन्नप्रतियोगिताकभेद एतदुभयवत्त्वं सत्त्वं तात्पर्य व
इति नोक्तातिव्याप्तिर्नवा गौरवमिति ध्या च कु[illegible]न तु कालादिमनःसंयोगस्यापि कालवि
षयाज्ञानकारणत्वात् तदाश्रयकालादावतिव्याप्तिर्दुर्वारेति चेन्नात्र प्रांचः ज्ञानका
रणत्वं ज्ञाननिष्ठकालिकसंबंधानवच्छिन्नकार्य्यतानिरूपितकारणतावत्त्वरूपं ए
वं च कालादिनिष्ठकारणतापि: कालिकसंबंधावच्छिन्नकार्य्यतानिरूपितत्वात्

९३

राम

कालादावतिव्याप्तिवारणाय विशेष्यदलं न हि दृष्टज्ञानकारणेत्वपि तद्वारणाय कालादावुद्भूत
रूपाभावचाक्षुषं प्रति चक्षुःसंयुक्तविशेषणताया हेतुतया न हि दृष्टकत्वं चक्षुःसंयोगस्यापि हेतु
त्वेन तत्रातिव्याप्तिवारणाय मनःपदं ननु आत्मभिन्नत्वविशेषणेनैवात्मन्यतिव्याप्तिवारणे संभ
वे गुरुभूतसमस्तविशेषणं व्यर्थमिति चेदत्र केचित् प्राचांमतेस्मिज्ञानोत्पत्तिवारणाय चर्ममनः
संयोगस्य रुधिरमनःसंयोगस्य मांसमनःसंयोगादेर्मतभेदेन हेतुत्वस्यावश्यकतया अनंतत
द्रेद्घटितलक्षणकरणे गौरवमित्याशयेन समस्तं तद्दलमित्याहुः अस्मद्गुरुचरणास्तु शब्दे तदेद्रू
न विशेषगुणत्वस्य तादृशविशेषगुणाश्रयत्वस्य चैकस्याभावात् तादृशगुणाश्रयव्यक्तयोगावं
स्य त्तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वमेव समस्तार्थो वाच्यः एवं चतादृ
शानेन भेदकूटनिवेशापेक्षया आत्मत्वरुधिरत्व मांसत्वचर्मत्वादिरूपानुगतधर्मावच्छिन्नप्रति

पृ

त्कृतमुक्तावलीप्रभायामनुसंधेयम् इति दिक् शरीरेंद्रियभिन्नेति शरीरेंद्रियभ्यो भिन्न इति शरी
वा रेंद्रिये भिन्ने यस्येति विग्रहः अन्योन्याभावार्थकभिन्नशब्दयोग एव पंचमीविधानात् प्रकृते
भिन्नशब्दस्य धर्मविशेषविशिष्टार्थकत्वेन षष्ठीसमासे वा बहुव्रीहिसमासे वा बाधकाभा
वात् तथा च शरीरेंद्रियधर्मविशिष्टो विषय इत्यर्थः तास्पर्शवैविध्यात् षष्ठ्यर्थ इति त्वस्य
भिन्नपदार्थैकदेशे धर्मेऽन्वयासंभवात् एवं शरीरत्वं शरीरसाधारणोपभोगसाधनत्वं वि
षयतासामान्यवत्त्वं विषयस्य सामान्यलक्षणमिति फलितम् प्रांचस्तु केवलविषयत्व
स्य शरीरादिसाधारण्ये तथा शरीरत्वादिवैयधिकरण्याभावेन परस्परवैयधिकरण्याप
न्नानामेव विभाजकत्वमिति नियमान्न तस्य विभाजकत्वमित्यत आह शरीरेंद्रियभिन्नेति
विशिष्ट शरीरत्वाद्यवच्छिन्नप्रतियोगिताकभेदद्वयविषयत्ववानित्यर्थः तथा च तादृशभेदद्व
यविशिष्टविषयत्वस्य शरीरादिसाधारणत्वाभावान्नोक्तदोष इत्याहुः तच्चिंत्यं प्रमाण

नदोषः कालिकसंबंधेन कार्य्यप्रतीतादात्म्येन कालस्य हेतुत्वात् नातिव्याप्तिरित्याहुः अ
त्रोक्तातिव्याप्तिवारणाय ज्ञानकारणसंयोगाश्रयत्वं ज्ञान॰ निष्ठकार्यतानिरूपितव्या
पारसंबंधावच्छिन्नकारणत्वरूपं वाच्यं कालादेस्तादृशकारणत्वाभावादेवातिव्याप्त्य
प्रसक्तेः म नःपदं व्यर्थं अतिमहाधिकरणादिमुक्तादृशकारणत्वाभावादेवातिव्याप्त्यप्रसक्तेः

सत्यं तद्दलं व्यर्थं न चालोकस्य संयोगसंबंधेन चाक्षुषहेतुतया तत्रातिव्याप्तिरिति वा
च्यं चाक्षुषे आलोकस्य तत्संयोगस्य च हेतुत्वे मानाभावात् अन्यथा चक्षुरादिवत् आ
प्रत्यक्ष लोकस्यापि प्रमाणत्वापत्तेः तस्मादालोकसंयोगस्य हेतुत्वे आलोकस्यान्यथासिद्ध
त्वमेव आलोकस्य संयोगसंबंधेन हेतुत्वे तु तादृशसंयोगस्य न व्यापारत्वमित्येवत्वी
कार्य्यं एवं च ज्ञाननिष्ठकार्यतानिरूपितव्यापारसंबंधावच्छिन्नकारणत्वमिंद्रि
यसामान्यलक्षणमिति फलितं अतो न कश्चिद्दोष इति प्रतिभाति अधिकं त्वस्म

त.प्र.
४८

रत्वरूपं दर्शयतीत्यर्थः एवमुत्तरत्रापि मूले शरीरमस्मदादीनामिति अस्मदादीनां शरीरं पा
र्थिवत्वरूपमित्यर्थः अस्मच्छब्देनयोनिजशरीरपरिग्रहः आदिना अयोनिजस्वेदजोद्भि
ज्जपरिग्रहः न च शरीरस्य पांचभौतिकत्वात् कथं पार्थिवत्वमिति वाच्यम् अस्मदादि
शरीरस्य पृथिवीसमवायिकारणकत्वेन पार्थिवत्वोपपत्तेः न च तच्छरीरस्य पृथिवीसम
वायिकारणकत्वे किं मानमिति वाच्यं स्वेदोष्मादेरभावकालेप्युपलभ्यमानगंध
स्यैव प्रमाणत्वात् इति इंद्रियं गंधग्राहकमिति न च घ्राणेंद्रियमानाभाव इति वाच्यम्
गंधसाक्षात्कारो मनोभिन्नेंद्रियकारणकः मानसेतरसाक्षात्कारत्वाच्चाक्षुषवदित्यनुमा
नस्यैव मानत्वात् एवं गंधपदस्थाने रूपादिपदं निवेश्य रसनादींद्रियाणि अग्रे साध
नीयानि गंधग्राहकमित्यनेन तस्य पार्थिवत्वे प्रमाणं सूचितम् तथाहि घ्राणेंद्रियं
पार्थिवं चाक्षुषनिष्ठलौकिकविषयतासंबंधावच्छिन्नकार्यतानिरूपितकारण ता

४८

९७

प्रमेयेत्यादिसूत्रविरोधापत्त्या नादृष्टानियमे मानाभावात् नादृष्टानियमांगीकारे प्रशस्त
पादाचार्यकर्तृकशरीरेंद्रियविषयभेदादिति विभागवाक्यस्य पर्य्यनुयोगानर्हत्वात् श
रीरेंद्रियविषयभेदादिति मूले केवलविषयत्वस्यैव विभाजकत्वे नोपास्यीतत्वेन तादृश
भेदरूपविशिष्टविषयत्वस्य मूलकारतात्पर्याविषयत्वाच्च अत एव शरीरेंद्रियविषयो वि
षयत्वेपि भेदेनोक्तिः शिष्यबुद्धिवैशद्यार्थमिति मंतव्यमिति मुक्तावल्यां विश्वनाथपंचा
ननेनोक्तमपि संगच्छते अस्मन्मानिरुक्तभेदरूपविशिष्टविषयविभाजकधर्मस्य शरी त्वरूप
रादिसाधारण्यानुपपत्तेरितिदिक् शरीरादिसामान्यलक्षणमुक्त्वा पार्थिवशरीरादिल
क्षणान्याह एवं चेति शरीरादिसामान्यलक्षणे प्रज्ञातेष्वित्यर्थः गंधवच्छरीरमिति गं
धवल्लिष्टनिरुक्तशरीरत्वं पार्थिवशरीरस्य लक्षणमित्यर्थः एवमुत्तरत्रापि तल्लक्षणं बो
ध्यमिति पृथिवीशरीरादिलक्षणं ज्ञेयमित्यर्थः पार्थिवशरीरं दर्शयतीति पृथिवीशरी

रिति आदिपदात् पृथिवीमात्रपरिग्रहः इंद्रियं गंधग्राहकमिति मूलस्य लक्षणं त्वसंभवनि
राकरणाय तादृशमूलप्रतिपाद्यविशेषणानां सार्थक्यप्रयोजनमाह दीपिकायां गंधग्रा
हकमित्यादिना अपां लक्षणमाहेति क्रमप्राप्तानामित्यादिः मूले शीतस्पर्शवत्य इति अ
त्र जलत्वं लक्ष्यतावच्छेदकं सा जातिः जन्यशीतजनकतावच्छेदकतया सिद्धजन्यजलमा
त्रवृत्तिवैशिष्ट्यमादाय न द्रवावच्छिन्नजनकतावच्छेदकतया परमाणुसाधारणतया सि
द्धिः सा जलत्वापरपर्यायापि स्वीक्रियते अंत्यावयविनो नित्यत्वे नित्यस्येत्यादि निय न
मभंगाभावात् अनयैव दिशा तेजस्त्वादिजातिसिद्धिरवधेया शीतत्वं स्पर्शत्वव्याप्य
जातिविशेषः प्रत्यक्षसिद्धः तदवच्छिन्नवत्त्वमेव लक्षणं ननु स्पर्शवत्त्वस्यापि सत्वे
शःव्यर्थत्वात् परं तु शीतत्वं स्पर्शत्वव्याप्यमिति स्फुटीकरणाय स्पर्शपदमुपात्तमिति
ध्येयं दीपिकायामुत्पन्नविनष्टजल इति द्वितीयक्षण इति ध्वंसप्रतियोगिजलरू लग

नाशृत्यत्वे सति घ्राणजनिष्ठलौकिकविषयतासंबंधावच्छिन्नकार्यतानिरूपितद्रव्यत्वसमा
नाधिकरणकारणतावत्वात् वाय्वानीतसुरभिभागवत् इत्यनुमानात्पृथिवीत्वसिद्धिः अ
त्रात्मादौ व्यभिचारवारणाय विशेष्यदलं घ्राणस्यापि कालोपाधिविधया चाक्षुषकारण
त्वादसिद्धिवारणाय सत्यंतघटककार्यतायां लौकिकविषयतासंबंधावच्छिन्नत्वनिवे
शः नवशरावगंधाभिव्यंजकजलादौ व्यभिचारवारणाय विशेषणदलं कालादेरपि का
लोपाधिविधया घ्राणजकारणत्वात् व्यभिचारवारणाय विशेष्यदलघटककार्यतायां
लौकिकसंबंधावच्छिन्नत्वनिवेशः घ्राणेंद्रियसंनिकर्षे व्यभिचारवारणाय कार्यतायां ण
द्रव्यत्वसामानाधिकरण्यपानिवेशः अनयैव दिशा घ्राणपदस्थाने रसनादिपदं निति
प्य रसनचक्षुस्त्वचां जलत्वादिकं साधनीयमिति दिक् नाशात्रवर्त्तीति अत्रावच्छेदे
ननाशावृत्तीत्यर्थः एवमुत्तरत्रापि पृथिवीविषयस्वरूपमाह विषयोमृत्पाषाणादि

वो

संबंधेन तादृशप्रतीतिविषयत्वाभ्युपगमे नैँपपत्तेः तत्र समवायेन शीतस्पर्शसाध
कप्रमाणाभावात् न तत्रातिव्याप्तिरिति भावः अन्यत्सर्वमिति नित्यत्वादिस्वरूपं
जलीयशरीरादीनां लक्षणं चेत्यर्थः पूर्वरीत्या व्याख्येयमिति दर्पिव्याद्वोह्यमित्यर्थः
ननु जलशरीरं च दृष्टा कुतो न गृह्यत इत्यत आह मले वरुणलोक इति तथा च दूरत्वा
न्नप्रत्यक्षाविषयमिति भावः न च तच्छरीरस्य जलत्वे किं मानमिति वाच्यम् जल
त्वं शरीरसमवेतं स्वसमवेतत्वसमवेतसमवेतत्वोभयसंबंधेन परमाणुवि

त्वे

शिष्टैँसतिजातित्वात् पृथिवीत्ववदित्यनुमानस्यैव प्रमाणत्वात् अनयैवादिशा
तेजस्त्वादिजातेरपि शरीरवृत्तित्वमनुमेयं जलादिशरीराणां पार्थिवत्वाभावेपि
पार्थिवभागोपष्टंभादुपभोगक्षमत्वं जलादिसमवायिकारणकत्वात् जलत्वादि
कमिति हृदयं तेजसोलक्षणमाहेति क्रमप्राप्तस्यौँदिः अत्राप्युक्तत्वाविनष्ठतेज

त्म

त्क

त्यर्थः द्रव्यत्वापरजातीति द्रव्यत्वव्याप्यजातीत्यर्थः अत्र जातेर्द्रव्यत्वव्याप्यत्वेन न
निवेशः मूर्तत्वजात्यभ्युपगमपक्षे तद्दोषतादवस्थ्यात् नवा तस्य साक्षाज्जातद्व्याप्य
त्वरूपत्वं अतिगौरवापत्तेः किंतु स्पर्शव्यसमवेतत्वेन निवेशः एवं च स्पर्शव्यसम
वेतशीतसमानाधिकरणजातिमत्त्वं लक्षणमितिफलितं अतो न काश्चिद्दोष इति
बोध्यम् यथाश्रुतपरिष्कृतलक्षणस्य स्पर्शादिव्यादावतिव्याप्तिभ्रमसंपादकभ्रमं
निराकरोति शीतं शिलातलमित्यादावपीति अत्र सप्तम्यर्थो निरूपितत्वं तस्य भा
नपदार्थविषयत्वेऽन्वयः आदिपदात् शीतः किरणः शीतो वायुरित्यादिप्रतीतिप
रिग्रहः जलसंबंधादेवेति जलरूपोपाधिसंबंधवशादेवेत्यर्थः एवकारेण तादृश
विषयत्वे स्वाभाविकत्वव्यवच्छेदः तथा च शीतं शिलातलमित्यादिप्रतीतेः जल
रूपोपाधिसंयोगसत्तानियतसत्ताकत्वाज्जलनिष्ठशीतस्पर्शस्य स्वसमवायिसंयोग

102

त्यर्थः भौमेत्यादि अत्र भूमौ भवं भौमं दिवि भवं दिव्यं उदरे भवं औदर्यं आकरे जाय
त इत्याकरजं इति व्युत्पत्तिरिति बोध्यं भौमं दर्शयति वन्ह्यादीति आदिना दीपादेः
परिग्रहः इंदनकाष्ठतैलादिरूपपार्थिवेंधनकं बोध्यं दिव्यं दर्शयति अबिंधन
मित्यादि दिव्यं विद्युदाद्यबिंधनमिति योजना आपः इंधनमुद्दीपकं यस्येत्यर्थः आदि
ना उल्कावडवानलपरिग्रहः औदर्यं दर्शयति भुक्तस्येति भुक्तौदनादेरित्यर्थः परि
णामहेतुरिति रसमलधातुरूपेण परिणामस्य निमित्तकारणमित्यर्थः जाठररू
पमिति यावत् आकरजं दर्शयति आकरः खनिः तत्र जातमित्यर्थः सुवर्णादीति आ
दिना रजतादिपरिग्रहः तत्र सुवर्णस्य तैजसत्वं व्यवस्थापयितुमादावादिपाति दीपि
कायां नान्वित्यादिना पीतत्वात् गुरुत्वादिति ननु पार्थिवत्वसाधने पीतत्वस्य दुष्ट
तया पार्थिवत्वव्यभिचारि गुरुत्वरूपहेतुत्वं नरूपणपने बीजाभाव इति चेदत्र प्राञ्चः

स्पर्शि व्याप्तिर्वा । रूपं उद्भूतसमानाधिकरणजलत्वसमवेतजातिमत्त्वं उद्भूतस्पर्शवत्त्वमि
त्यनेन विवक्षणीयं एवमेव वायुलक्षणमपि परिष्करणीयं अन्यथा त्वन्नाविनष्ट
वायाव व्याप्त्यापत्तेरिति ध्येयं यथाश्रुतपरिष्कृततेजोलक्षणस्य जलादावतिव्याप्ति
शंकां तत्रातिव्याप्तिसंपादकप्रतीतेः पदं प्रशंसं वं येनोद्भूतस्पर्शविषयकत्वस्य वस्याप
नेन परिहरति उष्णं जलमित्यादि प्रतीतेरिति आदिना शीतो वायुः उष्णमपो गोलकमि
त्यादिप्रतीतेः परिग्रहः तेजःसंबंधानुविधायित्वादिति तेजोरूपोपाधिसंयोगसत्ता
निपत सत्ताकत्वादित्यर्थः नातिव्याप्तिरिति तथा च तादृशप्रतीतेः सोपाधिकत्वेन
त लोहितस्फटिकप्रतीतेरिव स्वसमवायिसंयोगसंबंधेनोपाधिगतोष्णस्पर्शविष
यकत्वेनैवोपपत्तेर्जलादौ समवायेनोष्णस्पर्शसाधकप्रमाणाभावेन न तत्रातिव्याप्ति
रिति भावः मूले विषयस्य तु विषय इति प्रकारचतुष्टयान्यतमादिविशिष्टतेजोविषय

स

अनुमानांतरप्रणयनवैयर्थ्यापत्तेः उपाधीतरहेतुनैवोभयसाधनसंभवाच्च वस्तुतस्तु सु
वर्णं पार्थिवमित्यादावनुमाने सुवर्णत्वं पक्षतावच्छेदकं तथाति रजतस्य पक्षतावच्छेदका
नाक्रांततया तत्र पार्थिवत्वासिद्धिप्रसंगात् नापि रजतसाधारणं हि रूपत्वं पक्षतावच्छे
दकं तथा सति पक्षतावच्छेदकाश्रये रजतेपीतत्वरूपहेत्वभावेन भागासिद्धिप्रसंगात
तस्मात्पार्थिवत्वसाधने आद्ये सुवर्णं निर्भरः सुवर्णत्वे रूप्यपीतत्वाभावस्य पूर्वकेनाप्यप्र
तिपादितत्वेनानुज्ञार्थोपपादकस्यासंभवात् किंतु साधारण्यप्रतीतावाक्यप्रतिपाद्यते
जोभिन्नत्वसाधन एव पूर्वं सुवर्णादौ तेजस्त्वस्य ग्रंथकृता प्रतिपादितत्वात् तदसहमा
नस्यात्तेपसंभवात् अतएव तस्मात्सुवर्णं तैजसमिति उपसंहारोपि संगच्छते तथा
च रूप्यादिरूपपक्षतावच्छेदेन तेजोभिन्नत्वसाधनं भागासिद्धिग्रस्तत्वात् पीतत्वलिंगेन न
संभवतीति गुरुत्वरूपहेतुनानुसरणमपि निर्भाति अत्र सुवर्णं तैजसं रूपिव्याप्यप्र

प्रति

105

106

गुरुत्वस्य हेत्वंतरस्य स्वरूपकावाकारणाभावादेकत्र पीतत्वविशिष्टगुरुत्वं हेतुरिति न दोष इत्याहुः
तन्न केवलगुरुत्वस्य व्यभिचारित्वात् तच्छारणाय तत्समवायघटितसामानाधिकरण्यसं
बंधेन पीतत्वविशेषणस्यावश्यकत्वेन समवायसंबंधेन तस्यैव हेतुत्वौचित्येन विशेष्य
दलस्य व्यर्थत्वात् अन्यथा समवायघटितसामानाधिकरण्येन पृथिवीत्वविशिष्टद्र
व्यत्वादेरपि गंधानुमापकतापत्तेः न चेष्टापत्तिः व्यर्थविशेष्यदलघटितार्थप्रतिपा
दकहेतुवाक्यघटितन्यायस्य न्यायाभासत्वेन मणिकारप्रभृतिभिरपास्तत्वेन कथकसं
प्रदायविरोधापत्तेः प्राचीनैकदेशिनस्तु पीतरूपवत्त्वं पार्थिवत्वसाधकं गुरुत्वं
तेजोभिन्नत्वसाधकं न च क्षितीयानुमानं व्यर्थमिति वाच्यं परमतनिराकरणपू
र्वकस्वसिद्धांतकथनस्यावश्यकतया परानभिमततेजस्त्वाभावसाधनाय तस्या
११क वश्यकत्वादित्याहुः तदसत् सुवर्णस्य पार्थिवत्वसाधनेनैवाप्तीतेजस्त्वाभावनिर्णये

के

रेकज्ञानसहकृतप्रत्यक्षप्रमाणेनेत्यादिः कार्य्यकारणभावस्य प्रत्यक्षात्मनि निर्णयविषयत्वा
दित्यर्थः तथाच पृथिवीनिष्ठदैशिकविशेषणतासंबंधेन द्रवत्वनाशं प्रति एककालाव
च्छेद्यं यत् समवायदैशिकविशेषणताभयघटितसामानाधिकरण्यं तेन संबंधेन पृथि
वीभिन्नद्रवद्रव्यत्वावच्छिन्नप्रतियोगिताकाभावविशिष्टविजातीयतेजःसंयोगस्यफ
लोपधायकत्वेन प्रत्यक्षप्रमाणसिद्धत्वादिति समुदितवाक्यार्थः यत्ते हेतुसत्त्वमुपपा
दयति सुवर्णस्येति यौतिमाश्रयस्येत्यर्थः अत्यंताग्निसंयोगे सतीति समवायसं
बंधेन विजातीयाग्निसंयोगे सतीत्यर्थः सतीसप्तम्या एककालावच्छेद्यसामाना
धिकरण्यमर्थः तस्यानुच्छिद्यमानपदार्थैकदेशेनान्वयः अनुच्छिद्यमान
द्रवत्वाधिकरणत्वेनेति नाशप्रतियोगिद्रवत्ववत्त्वेनेत्यर्थः न त्वधिकरणत्वेऽप्या
पि तच्छरीरे प्रवेशः व्यर्थत्वात् किंतु तादृशद्रवत्वस्य समवायेन हेतुत्वलाभायाधिक

107

कार्यत्वे सति द्रव्यत्वात् इति परिशेषानुमानेन सुवर्णस्य तैजसत्वं साधयितुं हेतुघटक
विशेष्यासिद्धिस्वरूपासिद्धिवारणाय पार्थिवादिभिन्नत्वमपि साधनीयं तत्रापि द्र
व्यत्वपार्थिवीभिन्नत्वसाधकहेतोः स्वरूपासिद्धिशंकापरिहाराय पादावन्वयव्यतिरे
कौ दर्शयति अत्यंतानलेति विजातीयाग्निसंयोगसमये इत्यर्थः घृतादावित्यादि
ना जलादिपरिग्रहः द्रवत्वनाशादर्शनेनेति द्रवत्वनाशस्यानुभवासिद्धत्वेनेत्यर्थः
एतेन पार्थिवद्रवत्वनाशाद्विजातीयतेजःसंयोगयोः कार्यकारणभावग्राहका
न्वयसहचारसत्वमाविष्कृतं जलमध्यस्थघृतस्येति विजातीयाग्निसंयोगसत्यपी
ति शेषः नाशादर्शनेनेति द्रवत्वनाशस्यानुभवासिद्धत्वादिति भावः एतेन पार्थिव
द्रवत्वनाशं प्रति द्रवद्रव्यांतरसंयोगे प्रतिबंधकत्वमाविष्कृतं असति प्रतिबंधका
ति प्रतिबंधकाभावकाले इत्यर्थः कार्यकारणभावावधारणादिति अन्वयव्यति

३

कालिंगादित्यर्थः पीतद्रव्यद्रवत्वनाशप्रतिबंधकतायेति पीतरूपसमवायिनिष्ठद्रवत्वनाशप्र
तिबंधकतयेत्यर्थः द्रवद्रव्यांतराभिघातादिति वस्तुतोद्रवत्वाश्रयं पृथ्वीभिन्नेचयद्द्रव्यं तदनु
मितावित्यर्थः एतेनपरिशेषानुमाने विशेष्यासिद्धिः सत्यंतघटकपृथ्वीभिन्नत्वासिद्धि
श्चवारितासत्यंतघटकंजलभिन्नत्वंसाध्यतिनैमित्तिकेतिसमवायेननैमित्तिकद्रवत्वेने
त्यर्थः जलत्वानुपपत्तिरिति तथाचपीतरूपाश्रयनिष्ठद्रवत्वनाशप्रतिबंधद्रव्यंनजले क
समवायेननैमित्तिकद्रवत्ववत्वात् घृतवदित्यनुमानात् जलभिन्नत्वसिद्धिरितिभावः
रूपवत्तेपित्तिरूपवत्तपापीत्यर्थः अपिनानैमित्तिकद्रवत्वं समुच्चीयते वाष्पादिवद्रूपरूप
वद्भिन्नस्याप्रतिबंधकत्वे ननु तद्देतस्यापिप्रतिबंधकत्वानुपपत्त्या रूपवत्त्वस्वीकारस्यो
वश्यकत्वादितिभावः वाष्पादिष्वंतर्भावादिति वाष्पादित्वरूपत्वासंभवादित्यर्थः तथा
चताद्दशद्रव्यंवायुत्वापवाद्भिन्नप्रतियोगिताकभेदवत्तूवत नैमित्तकद्रवत्ववत्वात् रूप

ण त्वपदं पार्थिवत्वानुपपत्तेरिति पीतिमाश्रयनिष्ठद्रवत्वनाशप्रतिबंधकस्येत्यादिः पृथि
वीत्वरूपत्वासंभवादित्यर्थः तस्यापि पृथिवीत्वरूपत्वे विजातीयाग्निसंयोगेन तन्निष्ठद्रव
त्वस्याविनाशात् वाय्वादिवत् पीतिमाश्रयनिष्ठद्रवत्वनाशप्रतिबंधकत्वानुपपत्तिरित्या
शयः तथा च विजातीयाग्निसंयोगावि(च्छि)शिष्टपीतिमाश्रयत्वावच्छिन्नद्रवत्वनाशप्रतिबं
धका विजातीयद्रवद्रव्यसंयुक्तं एककालावच्छिन्नसामानाधिकरण्यसंबंधेन विजातीया
ग्निसंयोगविशिष्टनाशप्रतियोगिद्रवत्ववत्त्वात् जलमध्यस्थघृतवदित्यनुमानात्पृ
थिवीभिन्नद्रव्यसिद्धिरिति भावः अत्र यद्यपि द्रवत्वनाशप्रतिबंधकद्रव्यसंयुक्तत्वमेव
साध्यमुचितं ~~द्रव्ये विजातीयत्वद्रवत्वयोर्निवेशस्तथापि ध्येयं~~ तज्जातीयद्रव्यप्रतिबंधकत्वासं
भवात् वाय्वादेरिव द्रवद्रव्यस्य प्रतिबंधकत्वासंभवाच्च तथापि उत्कर्षस्फुरणाय साध्य
घटकद्रव्ये विजातीयत्वद्रवत्वयोर्निवेश इति ध्येयं उत्कर्षमुपसंहरति तस्मादिति निरू

त.प्र.
५६
त

अभिभूतत्वादित्यर्थः अनुपलब्धेरिति प्रत्यक्षाविषयत्वमित्यर्थः उपसंहरति
तस्मादिति प्रतिबंधकद्रव्यस्योष्णस्पर्शभास्वररूपत्वे बाधकाभावादित्यर्थः
तथा च प्रकृते हेतोः स्वरूपासिद्धत्वेन प्रतिपक्षरूपत्वाभावात् लिंगत्वानुमानात्तत्र तैजस
त्वसिद्धिर्निराबाधेति भावः सुवर्णं तैजसमिति तैजसत्वेन निर्णीत प्रतिबंधकद्रव्यमेव सु
वर्णं न तु हिरण्यमिति विशेषसामान्यशब्दैर्व्यवह्रियत इत्यर्थः एतेन पूर्वं तैजसत्वासि
द्धिरुक्त्वा तस्मादित्यादिग्रंथेन पुनस्तैजसत्वप्रतिपादनात् पौनरुक्त्यमिति शंका
निरस्ता वायुं लक्षयतीति वायुं लक्षणवंतं करोतीत्यर्थः वायुविशेष्यकलक्षणप्रका
रकज्ञानानुकूलव्यापारानुकूलकृतिमानिति समुदितवाक्यार्थः आकाशादावित्या
दिपदेन कालादिचतुर्णां परिग्रहः पृथिव्यादावित्यादिपदेन जलतेजसोः परिग्रहः
मूले रूपरहितेत्यादि रूपरहितत्वे सति स्पर्शवत्त्वं वायोर्लक्षणमित्यर्थः अत्र रूपरहि

ती
राम
५६

वत्वाच्च घटादिवदित्यनुमानान्नासिद्धिरिति भावः। यद्यपि एकेनैव नैमित्तिकद्रवत्वलिंगेन ज
लत्वाप्यत्वादिप्रतियोगिनानैकभेदसाधनसंभवे रूपवत्त्वेन भेदद्वयसाधनमनुचितं तथा
पि रूपवत्त्वेन भेदद्वयसाधने दीपिकाकारस्य न निर्भरः किं त्वरूपिद्रव्यत्वप्रतिबंधकत्वा
त् रूपवत्त्वमंगीकार्यं इति स्फोरणाय रूपवत्त्वहेतुना तत्साधितं अग्रिमरूपहेतुत्वासंभवे
न तस्य हेतुत्वकथनेनासिद्धत्वलाभसंभवादित्याशयः। तैजसत्वासिद्धिरिति प्रतिबंधकद्रव्य
स्येत्यर्थः। तैजसत्वासिद्धिरिति निरुक्तपरिशेषानुमानात्तैजसत्वासिद्धिरित्यर्थः। ननु तत्र तैजस ना
त्वे तत्रोष्णस्पर्शभास्वररूपयोः कुतो नोपलब्धिः तत्राह तस्येति अपव्यवानष्ठप्रतिबं
धकद्रव्यं न तैजसं उष्णस्पर्शाभावान्न भास्वररूपाभावाच्च घटादिवदिति प्रतिपक्षानुमानसं
भवात् नोक्तानुमानात्तैजसत्वासिद्धिरित्याशंक्य हेत्वोः स्वरूपासिद्धत्वप्रदर्शनेन परिहर
ति तस्येति प्रतिबंधकद्रव्यस्येत्यर्थः। उपष्टंभकेति अभिभावकेत्यर्थः। प्रतिबंधादिति

शालित्वात् चाक्षुषवदित्यनुमानात् त्वगिंद्रियसिद्धिरिति ननु तथापि तस्य वायुत्वे किं मानमिति
चेन्न त्वगिंद्रियं वायवीयं चाक्षुषनिष्ठलौकिकविषयतासंबंधावच्छिन्नकार्य्यतानिरूपि
तकारणताशून्यत्वे सति स्पार्शननिष्ठलौकिकविषयतासंबंधावच्छिन्नकार्यतानिरू
पितद्रव्यत्वसमानाधिकरणकारणतावत्वात् अंगसंगिसलिलशैत्याभिव्यंजकव्य
जनवातवदित्यनुमानस्यैव प्रमाणत्वात् घ्राणाद्यपेक्षया त्वगिंद्रियस्यास्य वैलक्ष
ण्यमाह सर्वशरीरवृत्तीति शरीरनिरूपितदेशविशेषानवच्छिन्नवृत्तिताश्रयमित्यर्थः
शरीरव्यापकमिति यावत् न च दंतलोम्नां शरीरोत्पत्त्यनंतरकालीनोत्पत्तिमत्त्व
स्यागमसिद्धत्वान्न व्यापकत्वभंगः ननु भाष्यकारैश्शरीरेंद्रियप्राणविषयभेदेन वा
यो चातुर्विध्यप्रतिपादनात् अत्र त्रैविध्येन विभजने बीजाभावः प्राणस्यातिरि
क्तद्रव्यत्वापत्तिश्चेत्यत आह शरीरेति यः वृक्षादिकंपनहेतुः स एव शरीरांतः

तत्वंसमवायसंबंधावच्छिन्नरूपत्वावच्छिन्नप्रतियोगिताकाभाववत्वरूपं ग्राह्यम्
तेन संयोगेन रूपाभाव रूपघटे रूपाभावमादाय नातिव्याप्तिः स्पर्शवत्वं च स्पर्शसमा
नाधिकरणद्रव्यविभाजकजातिमत्वरूपं वाच्यं तेनोत्पत्तिक्षणावच्छेदेन वायावुत्प
न्नविनष्टवायौ च नाव्याप्तिः नन्वेवमपि उत्पत्तिक्षणावच्छेदेन घटादौ उत्पन्नवि
नष्टघटादौ चातिव्याप्तिरिति चेन्न रूपासमानाधिकरणस्पर्शसमानाधिकरणजाति
मत्वस्य विवक्षितत्वान्नातिव्याप्तिरिति शरीरं वायुलोकरति वृत्तित्वेनागमप्रतिद्य
मित्यर्थः ननु तच्छरीरस्य वायुत्वे किं मानमिति चेन्न वायुत्वं शरीरसमवेतं परमा
णुसमवेतजातित्वात् पृथ्वीत्ववदित्यनुमानस्यैव प्रमाणत्वात् इंद्रियं स्पर्शग्रा
हकमिति स्पार्शनप्रत्यक्षकरणमित्यर्थः एतेन तत्रानुमाने प्रमाणं सूचितं तथाहि
स्पार्शनत्वावच्छिन्नं मनोभिन्नेंद्रियकरणकं मानसानिरूपितलौकिकविषयता

त्वग्ग्राह्य इत्युच्यते इति ननु वायौ प्रमाणाभावान्न स्पर्शलक्षणादिकमुक्तमित्याशंकां प्र
माणप्रदर्शनेन परिहरति दीपिकायां स्पर्शानुमेय इति तथा च महत्त्वोद्भूतरूपवद्द्रव्य
संयोगासमानकालीनप्रत्यक्षविषयस्पर्शः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्यसमवेतः
पृथिव्याद्यष्टद्रव्यासमवेतत्वे सति द्रव्यसमवेतत्वात् इति परिशेषानुमानात् पृथ्वि
व्याद्यष्टद्रव्यातिरिक्तवायुनामकनवमद्रव्यसिद्धिरिति नोक्तशंकेति भावः निरुक्तहेतौ वि
शेष्यासिद्धिं विशेषणासिद्धिं च वारयितुं तत्साधयति तथा हीति वायौ वाति सतीति वा
युसंयोगे सतीत्यर्थः अवभासत इति प्रत्यक्षविषयस्पर्शः तथा च वायुसंयोगसमा
नकालीनप्रत्यक्षविषयस्पर्शः फलितः ननु पक्षासिद्धिः वायुसाधनात्पूर्वं तस्यासि
द्धत्वेन तद्घटितस्य हेतोरप्यसिद्धत्वेनेति चेन्न वायौ वाति सतीत्यस्य महत्त्वोद्भूत

115

संचारीति प्राणशब्देन व्यवह्रियत इत्यर्थः तथा चादिष्वपत्वस्य सर्वसाधारणत्वाद्विषय
पत्वेनांगीकृतवृत्त्यादिकंपनहेतुभूतवायोरेव स्थानभेदेन प्राणशब्देन व्यवह्रीयमा
न तथा विषयत्वेनापि विभागः संभवतीत्याशयेन ऽनेविष्वमुक्तं ऽत एव नातिरिक्त
द्रव्यत्वापत्तिश्चेतिभावः सचैकोपीति शरीरांतः संचारी प्राणशब्दवाच्य इत्यर्थः ला
घवादेकोपि सन्नित्यर्थः उपाधिभेदादिति कोशप्रतिपाद्यहृदादिरूपस्थानभेदा
त्क्रियाभेदाच्चेत्यर्थः तथाहि हृदि वृत्तित्वात् श्वासनासिकानिष्क्रमणप्रवेशनाच्च प्रा
ण इत्युच्यते गुदस्थानवृत्तित्वात् मलादीनामधोनयनाच्चापानशब्देन व्यवह्रियते
नाभिदेशवृत्तित्वात् भुक्तस्यान्नादेः पाकार्थं वन्हेः समुन्नयनात्समान इत्युच्यते कंठ
देशस्थितत्वात् ऊर्ध्वनयनाच्चोदान इत्युच्यते सर्वशरीरवृत्तित्वात्सर्वनाडीषु प्रवेशा व्

ऽऽवच्छेदकत्वादित्यर्थः उद्भूतरूपे समवायघटितसामानाधिकरण्यसंबन्धेनोद्भूतस्पर्शवि
शिष्टपृथिवीत्वनिरूपितव्यापकतायाः अन्वयव्यतिरेकसहचारज्ञानसहकृतप्रत्य
क्षप्रमाणकारणकप्रमितिविषयत्वादिति फलितार्थः तथा च व्यापकाभावेन व्याप्या
भावानुमितेः प्रामाणिकतया प्रकृते निवृत्तस्पर्शाधिकरणे उद्भूतस्पर्शविशिष्टपृथि
वीत्वाभाववदुद्भूतरूपाभाववत्वाद्रूपादिवदित्यनुमानात् विशेषणवत्तया निर्णीते
पक्षे व्यापकतानवच्छेदकपृथिवीत्वाभाववत्वेनैव तस्यासिद्धेर्निष्प्रत्यूहत्वादिति
भावः ननूद्भूतरूपस्योद्भूतस्पर्शविशिष्टपृथिवीत्वव्यापकत्वे निर्णीते विशिष्टरूपस्य
केवलरूपानतिरेकितया केवलेपि व्यापकत्वनिर्णयसंभवात् व्यापकदले उद्भूत
त्वविशेषणं व्यर्थं एवं केवलस्पर्शविशिष्टपृथिवीत्वव्यापकतया अपि रूपे सं

117

118

रूपवद्द्रव्यसंयोगे सतीत्यर्थे तात्पर्यात् तथा च महत्त्वोद्भूतरूपवद्द्रव्यसंयोगासमानकाली
नप्रत्यक्षविषयस्पर्शस्य पतत्त्वलाभान्नोक्तानुपपत्तिरिति भावः क्वचिदाश्रित इति
द्रव्यसमवेत इत्यर्थः रूपवदिति अनेन विशेषणासिद्धिः परिहृता सत्यंतासिद्धिं क्रमे
ण परिहरति नचेति अस्येति तादृशस्पर्शस्येत्यर्थः पृथ्वीमात्रपद इति पृथ्वीव्यापि
करणमित्यर्थः तथा च सः स्पर्शः पृथ्वीव्यसमवेत इति फलितार्थः उद्भूतस्पर्शव
त्वार्थिवस्येति उद्भूतत्वं लौकिकविषयतावद्रूपमेव लाघवात् ग्राह्यमिति एव
मग्रेपि स्पर्शवतो घ्राणादेरुद्भूतरूपवत्त्वाभावान्नियमभंगवारणायोद्भूतत्वं स्पर्शविशे
षणम् तत्रैव तादृशद्रव्यत्वादिमति तद्वारणाय स्पर्शपदं तादृशस्पर्शवति भर्जनकपाल
स्थवह्न्यादौ तद्वारणाय पृथिवीपदं उद्भूतरूपवत्त्वनियमादिति उद्भूतरूपवत्तया

न.प्र.
९०
वा

लपृथिवीत्वनिरूपितव्याप्यकतायाः अपिप्रत्यक्षतो ग्रहसंभवात् तदभावेन पृथिवीत्वा
भावसाधनसंभवेच्च आप्यदले उद्भूतस्पर्शवैशिष्ट्यनिवेशनं व्यर्थमिति वाच्यम् उत्पन्न
विनष्टघटादौ तदभावेन व्यभिचारेणोद्भूतरूपस्य पृथिवीत्वाव्यापकत्वात् तस्माच्चाप्य
दले तादृशविशेषणमावश्यकमिति दिक् न जलतेजसीति तादृशस्पर्शस्याश्रयः न
जलं न वा तेज इत्यर्थः निरुक्तस्पर्शाधिकरणं जलत्वावच्छिन्नप्रतियोगिताकभेद
तेजस्त्वावच्छिन्नप्रतियोगिताकभेदोभयवदिति फलितार्थः तत्र हेतुमाह अनुष्णा
शीतस्पर्शवत्वादिति अनुष्णाशीतवत्वादित्यर्थः न तु स्पर्शवत्वस्यापि हेतौ प्रवेशः
व्यर्थत्वात् किंत्वनुष्णाशीतत्वं स्पर्शत्वव्याप्यजाति विशेष इति स्फुटप्रतिपत्त्यर्थं
स्तन्निवेश इति बोध्यं अत्रोद्भूतरूपे उद्भूतस्पर्शविशिष्टपृथिवीत्वव्यापकत्वव
त तादृशस्पर्शविशिष्टजलत्वादिव्यापकत्वं वाप्यानीतजलतेजोभागांतर्भी

११९

राम
९१

क

भवात् व्याप्यदलेप्युद्भूतत्वविशेषणं व्यर्थमिति चेन्न अतीन्द्रियस्याप्यात्मरूपत्वावच्छे
देन प्रत्यक्षत उद्भूतस्पर्शविशिष्टपृथिवीत्वव्याप्यतादृशानिर्णयासंभवेन रूपे तादृशपृ
थिवीत्वव्यापकं तादृशपृथिवीत्वव्यापकोद्भूतरूपव्यापकत्वात् उष्मत्ववदित्यनुमा
नेनैव केवलरूपे तद्व्यापकताग्रहो वाच्यः एवं च निरुक्तानुमानात् पूर्वमुद्भूतरूपे प्रात्य
क्षिकनिरुक्तव्यापकताग्रहस्यावश्यकतया तत एव प्रकृतार्थसिद्धेस्तत्पुनः केवलरूपे
निरुक्तव्यापकत्वानुमानं निष्प्रयोजनमिति आशयेनेदमेवाभिहितं एवमुद्भूत
रूपे केवलस्पर्शविशिष्टपृथिवीत्वव्यापकतापवादितत्वे स्पर्शेप्युद्भूतत्वनिवेश
नं एवं दलद्वयेप्युद्भूतत्वानुपादाने केवलरूपे केवलस्पर्शविशिष्टपृथिवीत्वव्या
पकतायाः प्रत्यक्षतो ग्रहासंभवात् अनुमानस्याप्रयोजकत्वशंकाकवलितत्वे
नासाधकत्वाच्च तस्माद्दलद्वयेपि तादृशविशेषणमावश्यकं न चोद्भूतरूपे केव

120

न

ति सुखादिर्न तेषु लौकिकविषयताशालिसाक्षात्कार इत्यर्थः इदं च मानसप्रत्यक्षलाभाय न तु त
द्विषयकत्वेनापि प्रवेशः प्रयोजनाभावादिति हृदयं साधनमिति कारणमित्यर्थः एतल्लाभा
येवेन्द्रियपदमुपात्तं न तेन रूपेण प्रवेशः गौरवात् तस्य च मानससाक्षात्कारः स्वकारणकः
कालिकसमवायोभयसंबंधेन साक्षात्कारत्वव्याप्तः चाक्षुषवदित्यनुमानान्मानसस्य
स्वकारणकत्वे सिद्धे तत्कारणत्वस्य त्वक्चक्षुरादीनामसंभवादतिरिक्तकरणसिद्धौ तद्दे
व मन इत्युच्यत इति भावः केचित्तु सुखाद्युपलब्धीत्यादिमूलस्य मानसकारणत्वरूपं
मनोलक्षणपरत्वमाहुः तन्न मनस्साधनं विना तल्लक्षणस्य प्रतिपादनस्यायुक्तत्वात्
[illegible]नतापि [illegible]हाराय स्वयं मनोलक्षणमाह दीपिकायां स्पर्शरहितत्वे सतीति इदं च घ
टादावतिव्याप्तिवारणाय समवायसंबंधावच्छिन्नस्पर्शत्वावच्छिन्नप्रतियोगिताका
भावकूटवत्त्वं तदर्थः तेनाव्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकव्यासज्यधर्मा

समुदितार्थः कृतस्नानेत्यादि कृतयागादिकर्मजन्यधर्मादेः स्वर्गादिजनकत्वानुपपत्तिः
धर्मादिसाधनं विना फलप्राप्तिश्च स्यादित्यर्थः अयं भावः तत्तद्यागादिकर्मजन्यधर्मादे
रात्मनाशेन नाशात् स्वर्गादिफलजनकत्वासंभवेन यजेत स्वर्गकाम इत्यादिविधीनां नष्टु
तांपि वेदित्यादिनिषेधानां चाप्रामाण्यापत्तिः उत्पन्नात्मनां सर्वेषां धर्माद्यभाववत्त्वस्या
विशिष्टतया केषांचित्सुखवत्त्वमनुभूयमानमनुपपन्नं स्यात् तत्तत्साधनाभावस्य सर्वेषां तु
ल्यत्वात् सर्वेषां सुखवत्त्वं दुःखवत्त्वं स्यात् एवं जातमात्रस्य स्तन्यपाने प्रवृत्त्यनुपपत्तिः
तदा इष्टसाधनत्वानुभावाभावात् अनुभवजन्यसंस्काराभावेन तत्स्मरणाभावाच्चेतिभा
वः उपसंहरति तस्मादिति जीवस्याणुत्वमध्यमपरिमाणवत्त्वानित्यत्वानामसंभवादि
त्यर्थः नित्यो विभुर्जीव इति नित्यत्वपक्षे महत्परिमाणवत्त्वोभयपक्षयोर्जीव इत्यर्थः मन
सोलक्षणमाहेति मनसो लक्षणं वक्तुमादौ प्रमाणमाहेत्यर्थः मूले सुखाद्युपलब्धी

मनसः आनंत्येऽनुमानप्रमाणं दर्शयति तत्राहि एतदात्मसमवेतमानसकारणं मनः एतदा
त्मभिन्नसमवेतमानसकारणभिन्नं एतदात्मभिन्नात्मसमवेतमानसासाधारणकारणमनःसं
योगाप्रतियोगित्वात् घटवदिति अनुमानान्मनस आनंत्यसिद्धिरिति भावः उक्तार्थमेव प्रका
शयति दीपिकायामेकैकस्यात्मन इति एकैकं मनः एकैकात्मसमवेतमानसकारणमेवे
त्यर्थः अन्यथा सकलात्मप्रत्यक्षापत्तेरिति भावः इत्यात्मनामनेकत्वादिति इत्याकारकहे
तोरात्मानेकत्वप्रयुक्तं मनसोऽप्यनेकत्वमित्यर्थः मनसो मूलोक्तं परमाणुरूपं व्यवस्था
पयितुमाह मध्यमपरिमाणवत्त्वे त्विति मध्यमपरिमाणवत्त्व इति मनस इत्यादिः अ
पकर्षाश्रयमहत्त्वावत्त्व इत्यर्थः अनित्यत्वप्रसंगादिति एकैकात्मसमवेतमानसे
ष्वपि बहूनां कारणानां तद्ध्वंसानां तदुत्पादकानां च परमाणुपर्यन्तानां कल्पनीयतया
महागौरवप्रसंगात् एतादृशमनोवयवधाराविश्रामाश्रयस्यैव परमाणोरेकस्य ला

124

वाच्छिन्नप्रतियोगीताकं यो भाव मादाय न दोष नादवस्थं आकाशादावति व्याप्ति

वारणाय विशेष्यभागः न च गुरीतन्त्राविष्टमनति क्रियाभावादव्याप्तिरिति वाच्यम्

त्रियावत्त्व शब्दस्य क्रियाधिकरणपरत्वात् न चैवमपि कठिनस्तु कुमारस्पर्श वदव

पवारव्यद्रव्यस्याचित्रस्पर्शानंगीकारेनचेति स्पर्शत्वात्तत्राति व्याप्तिर्नादवस्थ्यापि

ति वाच्यम् क्रियावत्त्वशब्दस्य स्पर्शाधिकरणवृत्ति क्रियावद्वृत्तिजातिमत्त्वस्य विव

दितत्वात् इदमुपलक्षणं मानसकारणतावच्छेदकतया सिद्धजातिविशेषरूपं

मनस्त्वं मनसो लक्षणमित्यपि बोध्यम् सुखाद्युपलब्धीत्यादिना मनः प्रमाणे दानीं

मनसोऽनंतत्वं सापयति नस्तेति निरुक्तप्रमाणासिद्धं मनश्चेत्स्पर्शः अवधारणा

सत्यात्मानियतत्वात् ज्ञानोत्पत्त्यर्थं नियमेन संयोगसंबंधेन संवाधित्वादित्पर्थः एतेन

न.प्र.
८९

ऽसमवायिकारणाभावादिति भावः न च तादृशनियमे मानाभावः द्रव्यस्यैव कारणत्वप्र जन्य
त्वनियमादेवं चासमवायिकारणं विनाकार्योत्पत्त्यसंभवेन प्रकृते ज्ञानाद्युत्पत्तौ बाधकाभा
व इति वाच्यम् तथा सत्यात्मनि सुषुप्त्यावपि ज्ञानोत्पत्तिप्रसंगात् मनसः कारणत्वानुपपत्तेश्च
विभुद्वयसंयोग इति तादृशसंयोगोऽपीत्यर्थः अस्तीति प्रामाणिक इत्यर्थः तत्संयोगस्येति आ
त्ममनोरूप विभुद्वयसंयोगस्येत्यर्थः नित्यत्वेनेति नाशासंभवेनेत्यर्थः अत्र तृतीयां
तं सर्वदाविद्यमानत्वादिति अत्र हेतुः सर्वदाविद्यमानत्वे च सुषुप्त्यभावप्रसंग हेतुरिति तद
दयम् तथा चाश्रयनाशात् क्रियाजन्यविभागाद्वा संयोगनाशस्य वाच्यतया आत्ममनसोर्नि
त्यत्वात् क्रियारहितत्वाच्चाश्रयनाशक्रियाजन्यविभागरूपनाशकाभावेन सर्वदा सत्त्वादिति
भावः इदमुपलक्षणं मनसो विभुत्वे पुरीतति नाडीप्रवेशासंभवेन सुषुप्तिर्न स्यात् इत्यपि बोध्यं
सुषुप्त्यभावप्रसंगात् न चेष्टापत्तिः अनुभवविरोधादिति भावः विभुत्वसाधकानिरुक्तानुमान
म प्रयोजकत्वात् नसाधकमिति सूचितं अस्तु मुरू चरमाणु मनो ऽविभु आत्ममनः संयोगवत्त्वाद् घटवत्

125

घटेन मनस्त्वकस्यनोचेत्स्यात्तमवेतिभावः इदानीं परममहत्परिमाणवत्त्वं त्वं इष्टं तु मास्तिपातिन

न्वितिविश्विति परममहत्परिमाणवदित्यर्थः स्पर्शरहितद्रव्यत्वादिति घटादौ व्यभिचारवार

णाय स्पर्शरहितेति गुणादौ व्यभिचारवारवारणाय विशेष्यदलं यद्यपि एतस्य हेतुत्वे उत्पन्नवि

नष्टघटादौ व्यभिचारः विशेषण विशेष्यभावे विनिगमनाविरहः प्रयुक्तो हेतुतावच्छेदकरू

पेण हेतोरनिर्णयो विशेषण विशेष्योभयत्वावच्छिन्नस्य हेतुत्वे हेतुतावच्छेदकसंबंधा

प्रसिद्धिश्चेति दोषः प्रसज्यते तथापि स्पर्शवदवृत्तिद्रव्यविभाजकधर्मवत्त्वहेतोता

त्पर्यान्नोक्तदोषः विभुत्व इति परममहत्परिमाणवत्त्व इत्यर्थः आत्ममनःसंयोगस्येतिविभु

द्वयसंयोगाभावेनेत्यादिः आत्मनि मनःसंयोगस्येत्यर्थः तेन यथाश्रुते आत्ममनःसंयोग

स्याप्रसिद्ध्याप्रसिद्धो स्तान्निषेधानुपपत्तिरूपदोषःप्रत्युक्तः अभावादिति अवृत्तेरि

त्यर्थः ज्ञानानुत्पत्तिप्रसंगादिति भावमात्रस्य कारणत्वपजन्यत्वनियमेन प्रकृते

न.प्र.
८०

स्मृतस्योपेक्षानर्हत्वरूपप्रसंगासंगत्या आदौ रूपलक्षणकारणमिति भावः मूले चक्षुर्मात्र
ग्राह्यमिति चक्षुरितराग्राह्यत्वे सति चक्षुर्ग्राह्यमिति तदर्थः अत्र चक्षुरितराग्राह्यत्वं चक्षुर्भिन्न
निष्ठव्यापारसंबंधावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकज्ञाननिरूपितलौकिकवि
षयताशून्यत्वरूपं वाच्यं तेन रूपस्य कालोपाधिविधया त्वगादिजन्यचाक्षुषविषय
त्वेपि ज्ञानलक्षणप्रत्यासत्त्या स्फटिकादिस्पार्शनविषयत्वेपि नासंभवः चक्षुर्ग्राह्यत्वं
च ज्ञाननिरूपितलौकिकविषयत्वरूपं वाच्यं ज्ञाने चक्षुर्जन्यत्वविशेषणस्य व्यर्थत्वात्
तेन धर्माधर्मादेरपि ईश्वरज्ञानविषयत्वेपि अनुमितिविषयत्वेपि च नातिव्याप्तिः प्र
भायामतिव्याप्तिवारणाय गुणपदं न चैवं परमाण्वादिरूपेऽव्याप्तं उपरिदेशावच्छेदेनावि
हंगमपसंयोगविशेषेऽतिव्याप्तं चेति वाच्यं तादृशविषयताशून्यज्ञाननिरूपित

127

रूप

न्पूर्वोक्तहेतोः सत्प्रतिपक्षत्वं वक्तुं प्रतिहेतौ स्वरूपासिद्धिशंकां वारयति मनस इति आत्मम
नःसंयोगस्येत्यादि असमवायिकारणमनःसंयोगस्याभावात् इत्यर्थः ज्ञानानुत्पत्ति
प्रसंगादितितथाचानायत्या [illegible] मनस्यात्ममनःसंयोगस्वीकार इति भा
वः प्रतिहेतौव्यभिचारमाशंक्य निराकरोति नचेत्यादिना विद्यमानत्वादिति तथाचाना
यत्याऽऽत्मसंयुक्तस्यैव विभुत्वमितिभावः इति व्याचक्षुः सिद्धांते तादृशदोषनिराकरणाया
रात मुपसंहरति अणुत्व इति मनसः शरीरांतःस्वीकार इत्यर्थः द्व्यणुकरूपत्वेऽनित्य
त्वापत्त्योक्तगौरवापत्तेः प्रविशतीति परमाणोः क्रियावत्त्वादिति भावः इत्यणुत्वासिद्धि
ति इत्याकारकप्रमाणेन परमाणुत्वं साधितमितिभावः रूपं लक्षयतीति गुणविभाजक
वाक्यप्रथमोपस्थितमित्यर्थः तथाच तादृशवाक्यात्प्रथममेव रूपस्योपस्थितत्वात्

128

३२

न.प्र.
८१

द्विपघटितलक्षणकारणोपेक्षया एतल्लक्षणस्य लघुभूतजातिघटकत्वोक्तौ केऽद्विपघटितत्वात्
लाघवमित्याहुः अस्मद्गुरुचरणास्तु आत्मीनलक्षणे त्वाङ्गिष्ठव्यापारसंबंधावच्छिन्नकारण
तानिरूपितकार्यताश्रयज्ञानत्वेन ज्ञानस्य न प्रवेशः गौरवात् किंतु स्पार्शनत्वेन लाघवात्
२ एवं स्पार्शननिरूपितलौकिकविषयताशून्या लौकिकविषयताश्रयगुणवृत्तिर्या जातिस्त
द्वत्वमेव मूलकाराभिप्रेतं लघुरूपलक्षणमिति आचक्षुः अत्र चक्षुर्मात्रग्राह्यत्वं च चक्षु
रितरेन्द्रियाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वमिति प्राचीनव्याख्याने सत्यंतरूपघटकज्ञानस्य त
न्निरूपितविषयत्वस्य वा चक्षुरितरनिष्ठव्यापारसंबंधावच्छिन्नकारणतानिरूपितका
र्यताश्रयज्ञानत्वेन तन्निरूपितत्वेन च लक्षणेन प्रवेशः गौरवात् किंतु ज्ञानस्य चाक्षुषा
न्यत्वेन तदीयलौकिकविषयतायाश्चाक्षुषानिरूपितत्वेन वा निवेशः लाघवात् तथा च तम

129

लौकिकविषयताश्रयगुणवृत्तिजातिमत्त्वस्य विवादितत्वात् नोक्तदोषस्यावकाशं एतेन
विनिगमनाविरहप्रयुक्तानेकलक्षणापत्तिः विशेषणविशेष्यसमुदायस्य लक्षणत्वे लक्षण
तावच्छेदकसंबंधाप्रसिद्धिरिति दूषणमनवकाशमिति भावः नव्यास्तु चक्षुर्ग्राह्यमिति त्वग्ग्राह्यं
चक्षुर्ग्राह्यमित्यर्थः त्वग्ग्राह्यत्वं च त्वङ्निष्ठव्यापारसंबंधावच्छिन्नकारणतानिरूपितकार्य
ताश्रयज्ञाननिरूपितलौकिकविषयताशून्यत्वं तत्प्रयोजनं चोक्तमेव चक्षुर्ग्राह्यत्वं ज्ञान
निरूपितलौकिकविषयतावत्त्वं ज्ञानांशे चक्षुर्जन्यत्वनिवे[illegible]शे प्रयोजनं न विरुणातत
अत्राप्युक्तसकलदोषवारणाय त्वङ्निष्ठव्यापारसंबंधावच्छिन्नकारणतानिरूपितका
र्यताश्रयज्ञाननिरूपितलौकिकविषयताशून्या लौकिकविषयताश्रया च गुणवृत्तिजा
तिः तद्वत्त्वमिति लक्षणं परिष्कारणीयम् एवं च गुरुभूतचक्षुर्भिन्नत्वेन त्वगादिसकलें

घ

न.प्र.
९२

तिरूपानुत्पत्त्या समवायेन जन्यरूपत्वावच्छिन्नं नीलत्वावच्छिन्नं प्रति वा रूपत्वेन प्रतिबंधकत्वं
वाच्यं शुक्लादिरूपसत्त्वेऽपि नीलाद्यनुत्पत्तेः एवं समवायसंबंधावच्छिन्नतद्धर्मावच्छिन्न
प्रतिबध्यतानिरूपितसमवायसंबंधावच्छिन्नप्रतिबंधकतावच्छेदकतया रूपत्वजाति
सिद्धिसंभवादित्यपि बोध्यम् प्रांचस्तु विषयतासंबंधेन स्पार्शनं तादात्म्यसंबंधेन रूपस्य प्र
तिबंधकतया तदवच्छेदकतया रूपत्वजातिसिद्धिरिति वदंति तदसत् रूपेतररसादाव
पि स्पार्शनानुत्पत्त्या स्पार्शनं प्रति रसत्वादिनाप्यनेकप्रतिबंधकत्वापत्त्या गौरवेणोक्तप्र
तिबध्यप्रतिबंधकभावानभ्युपगमात् किंतु रूपादौ स्पार्शनोत्पत्तिवारणाय गुणनिष्ठ
लौकिकविषयतासंबंधेन स्पार्शनं प्रति तादात्म्येन स्पर्शस्य हेतुत्वं स्वीक्रियते लाघवात्
एवं च नोक्तरीत्या रूपत्वजातिसिद्धिरिति मूले तच्चेति निरुक्तलक्षणलक्षितरूपं चेत्यर्थः

प्राति

राम

131

चाक्षुषानिरूपितलौकिकत्वविषयताशून्यत्वलौकिकविषयत्वगुणवृत्तित्वैतत्त्रितयविशि
ष्टजातिमत्त्वं प्राचीनाभिमतरूपलक्षणं फलितं नचैवमपि स्पार्शननिरूपितरूपलघुधर्म
प्रकारेण लौकिकविषयत्वविशेषस्य चाक्षुषनिरूपितत्वरूपगुरुधर्मप्रकारेण
लौकिकविषयत्वविशेषनाशोऽवामितिवाच्यम् अवच्छेदकाभावसंपादकतया वैयर्थ्या
भावात् एतेन प्रात्यमात्रपदलभ्यचक्षुरितराग्राह्यत्वघटितलक्षणसंभवे तत्परित्यज्य
लक्षणयामात्रपदलभ्यत्वं ग्राह्यत्वघटितलक्षणकरणमनुचितमिति दूषणं प्रत्युक्तं त
स्माच्चक्षुर्मात्रग्राह्यमिति मूलस्य प्राचीनपरिष्कारे एवं सामान्यतश्चक्षुर्मात्रग्राह्य इति
प्रयोक्तुर्मूलकारस्यापि निर्भर इति प्रतिभाति यथाश्रुतरूपलक्षणघटकदलप्रयोजनमा
ह दीपिकायां रूपत्वेऽतिव्याप्तीति इदमुपलक्षणं रूपत्वजातिमत्त्वमपि तल्लक्षणं रूपव

ग

वै

132

इति

प्रतीतिविषयत्वकल्पनापत्त्या गौरवात् एतैरूपमात्रस्य व्याप्यवृत्तित्वे तु नानारूपवदव
यवावच्छेदेतिरिक्तचित्ररूपस्यैवोत्पत्त्यापत्तेस्तस्यैवाश्रयप्रत्यक्षहेतुत्वं चित्ररूपमिति प्रती
तिविषयत्वं संभवति नो गौरवप्रसक्तिः अत एव एकं चित्ररूपमिति प्रतीतेः प्रमा
त्वमुपपादयत इति नन्वस्तु रूपस्य व्याप्यवृत्तिमस्तु च नानागंधवदवयवावच्छेदघटस्पर्शनि
गंधवन्नानारूपवदवयवावच्छेदघटस्यापि नी रूपत्वेन तादृशघटविशेष्यकगंधप्रत्यक्ष
स्यावयवगंधमादायोपपत्तिवत् तादृशपटविशेष्यकरूपप्रत्यक्षस्यापि अवयवरूप
मादायोपपत्तिसंभवादित्याशयेन आक्षिपति ननु चित्रपट इति रूपरहितत्वेनेति
समवायेन रूपसामान्याभावेनेत्यर्थः पटस्येति नानारूपावयवावच्छेदपटस्येत्यर्थः अप्र
त्यक्षत्वप्रसंगादिति प्रत्यक्षतानिहँ लौकिकविषयत्वाभावप्रसंगादित्यर्थः द्रव्य इति

दिते

राम

133

हि रूपं

अवधारणार्थकचशब्दः सप्तविधेत्युक्तं योऽयः शुक्लनीलेत्यादि सप्तविधमित्यंतग्रंथस्य
शरीरेंद्रिय विषयभेदादित्यादि ग्रंथार्थरीत्यास्यार्थो ज्ञेयः सप्तविधमिति सप्तविधमेवेत्यर्थः
एवकार व्यवच्छेद्य नवीनाभिमतरूपानि स्वबुद्धि परत्वे दूषयितुं तन्मतमुपन्यस्यति दीपिका
यां नान्वित्यादिना अव्याप्यवृत्तिनीलादिसमुदाय इति नीलादीनामव्याप्यवृत्तित्वं विनातत्स
तं मुदायस्यैकत्रवृत्तित्वाभावादित्यर्थः चित्ररूपमिति चित्ररूपमिति प्रतीतिविषय इत्यर्थः तथा
च तादृशनीलादिसमुदायविषयत्वांगीकारेणैव तादृशप्रतीत्युपपत्तेरतिरिक्त चित्ररूपांगी
कारोतिप्रामाणिक इतिभावः रूपस्याव्याप्यवृत्तित्वनियमादिति रूपत्वस्याव्याप्यवृ
त्तित्वव्याप्यत्वादित्यर्थः प्राचामयमाशयः रूपस्याव्याप्यवृत्तित्वे नानारूपवदवयवा
रब्धद्रव्यप्रत्यक्षे समवायेन नानारूपाणां हेतुत्वकल्पनापत्त्या नानारूपेषु चित्रमिति

134

मूलेलोके गुणपदं व्यर्थमिति वाच्यं वायोः स्पार्शनांशकारमते वायुत्वजातिमादाय गुणपदस्यार्थ
क्यात् स्पर्शलक्षणेपि यथाश्रुतमूलानुसारेण गुणत्वविशेषणप्रयोजनमाह दीपिकायां स्पर्श
त्वरति मूले रूपादिचतुष्टयं पृथिव्यां पाकजमिति रूपादिचतुष्टयघटकं यद्यत् पृथिवीवृत्तितत्त्व
अतएव वं पाकजं अनित्यमित्यर्थः अन्यत्रापाकजमित्यत्र रूपादिचतुष्टयमित्यनुषज्यते रूपादिच
तुष्टयघटकं यद्यत् जलादि वृत्तितत्त्वदमपाकजं अतो नित्यमनित्यं चेत्यर्थः उभयमुदाहरति एव
नित्यगतमिति रूपादिचतुष्टयघटकं यन्नित्यजलादि वृत्तितत्त्वं नित्यमित्यर्थः अनित्य
गतमिति रूपादिचतुष्टयघटकं यदनित्यजलादिवृत्तितत्त्वमनित्यमित्यर्थः पाक
जमिति मूलस्य पाकजशब्दस्यार्थं वक्तुमादौ पाकपदार्थमाह दीपिकायां पाक इति तेजः

वोक्तप्रायं तादृशतानस्पर्शत्वेनैव निवेशः अत्र परमाणवादिरसे ऽव्याप्तिवारणाय तादृशावि

रस षयत्वाश्रयस्य रूपत्वजातिमत्त्वं विवक्षणीयं तत्सत्त्वाभावेन गुणमिति ध्येयम् यथाश्रुतमू

लार्थानुरोधेन गुणत्वदलप्रयोजनमाह दीपिकायां रसत्व इति आश्रयं विभज्य दर्शयतीति

ला रसोऽमात्याश्रयं प्रदर्श्य रसविभाजकधर्मोपाधिनाश्रयं विशेष्य दर्शयतीत्यर्थः मूले द्वि

व्यां षड्विध इति रस[illegible] इत्यनुषज्यते अर्थस्तु पूर्ववत् घ्राणग्राह्यो गुणो गंध इति एतस्य रस

नग्राह्यो गुणो रस इति ग्रंथार्थरीत्या अर्थो ज्ञेयः त्वगिंद्रियमात्रग्राह्य इति एतस्य रूपग्रंथो

क्त दिशार्थो ज्ञेयः न च स्पार्शनान्यनिरूपितलौकिकविषयताशून्य लौकिकविषयताश्रय

जातिमत्त्वमात्रस्य स्पर्शलक्षणत्वेप्य ।नातिप्रसक्तेः जातौगुणवृत्तित्वनिवेशे प्रयोजनविरहेण

136